Digitized by Sarayu Trust Foundation and eGangotri

हंसराज कालेज,
देहली.
१. ८. ५५

मान्यास्तात चरणाः,

सप्रश्रयमभिवादये

अद्यैव सम्प्राप्तं श्रीमतां पत्रं वृत्तं चावगतम्। अहिमापुरतः समानीतः पुस्तकनिचय इति सन्तुष्यामि। यान्यपेक्षितानि पुस्तकानि नालप्सत तत्र तेषां विपरिलोपे न कमपि हेतुमुत्पश्यामि। शारदारञ्जनसम्पादितं शाकुन्तलं मया वाराणस्यामकायि। मुकुन्दझा कृतनिरुक्तस्य [illegible] सविधं वर्तमानस्य कथं क्व वा भ्रंशोऽजनीति नोन्नेतुं पारयामि। अथवा

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

किं गतस्यानुशोचि-
तेन।
अथ प्रसत्स्यन्ति
श्रीमन्तो वृत्तमिदमधि-
गम्य यत् काशिक-
हिन्दूनिश्वविद्यालया-
धिकृतैरप्रैलमईजून-
मासानामपि छात्रवृत्ति-
र्दायिष्यत इति। तेना-
नभ्रवृष्टिरेवैषेति परमः
प्रहर्षः। गृहमधिकृत्य
तु ह्यः प्रहितचरे पत्रेन्यत्रेण
न्यवीविदम्। साम्प्रतं तु
श्रीमतामत्रागमनं स्वेच्छ-
मुदीक्ष्यते विनीतेन
मया सत्यव्रतेन॥

पोस्ट कार्ड

अम्बाला
4 AUG
8 AM
1955

अवधी

केवल पता

To

नाम Prof Charu Devaji Shastri,

पता 3 Cross Road,

डाकखाना Panjabi Mohalla,

ज़िला AMBALA CANT.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

POSTAGE
5 NP.
INDIA

सेवा में—

श्री प्रो. वासुदेव मी शास्त्री
एम-ए.
C/o श्री डा. सत्यव्रत जी
एम-ए.
23 F कमला नगर
नवजी मंडी
दे. दिल्ली
Delhi

CC-0. Prof. Satya Vrat Shastri Collection.

ओ३म्

११.८.५६

श्रीजयभगवान वकील
पानीपत

हृद्याय वन्द्याय गुणान्विताय
प्रियोषसे सत्यरताय भूयः।
पुराणमित्राय महोदयाय
श्रीचारुदेवाय नमस्करोमि ॥१॥
शास्त्रेष्वधीती निपुणप्रतीतिः
सत्यव्रतो यत्तनयो विधेयः।
आचामवाचां विदुषां सुवाचा-
माचामकः प्राग्रहरः प्रसिद्धः ॥२॥
शास्त्रीति लब्ध्वा पदवीं प्रयत्नात्
एम. ए. पदालंकरणोऽचकाद्यः।
अविभ्रजत् पण्डितमण्डलीषु
प्रोज्जृम्भमाणं पितरं च साधुः ॥३॥
पी एच डी नाम महत्यभिख्या
यमाप्तमाप्त्वाऽजनि सत्कृतार्थः।
आचार्यवर्यं सरलाशयं तं
डी लिट् पुरास्तीति विभावयामि ॥४॥
मान्याः प्रवयसः शास्त्रिणः!
सप्रणयमभिष्टवीमि।
अविदं भवदीयं दलमद्वितीयं द्वितीयं च। परं नाय-
पारमगारमितो गतो निजमभयमुभयमपि तद् यन्नादिष्टं
प्रत्यादेष्टुम्। मन्ये तत्र भवन्तो मर्यादिष्वप्यवधीर-
णाकृतमेजदेनः। भवता चिरमागमितं, मया च

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

CC-0. Prof. Satya Vrat Shastri Collection.

अम्बालयत:
३१।७।५५

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्यायुष्मानेधि । ह्यस्ते लेखो धिगतो वृत्तान्त-
श्चावगत: । अहमप्यत्रार्थे त्वन्मते स्थित:, अम्बापि
ते तथादर्शिनी । तेनागस्त्यमासस्य द्वितीयस्मिन्दिवसे
भौमवासरे फलाङ्गमेल् इति रेलयानेनेत: प्रस्थास्ये, नक्तं
सपादनवसु होरासु च देहलीमासादयिष्ये । नक्तं विरलं
भुञ्ज इति तत्र वेलायां मदर्था भोजनसंविधा न विधेया।
अहियापुरत आहृतानि त्वदर्थानि पुस्तकानि सहानेष्ये।
अम्बायास्ते सन्त्वाशिषो भूरय इति सन्दिशन्विरमति
वत्सलस्ते तात श्चारुदेव श्शास्त्री ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

नाम प्रो॰ सत्यव्रत शास्त्री एम॰ ए॰

पता संस्कृताध्यापक

डाकखाना हंसराज कालेज,

ज़िला दिल्ली

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

जालन्धरतः
९।८।५६

प्रिय सत्यायुष्मानेधि।

निर्मिता भूषा ह्यः सायाह्ने प्राप्तवम्, परं परीक्षावसरं तु नापम्। अद्य प्रातः परीक्षामवीकरम् तत्राप्यवशेषोस्तीति श्वः प्राह्णे तं निःशेषयिष्यामि। श्वो मध्याह्ने प्रस्थाय सायमम्बालयमासाद्य तत्रानुजे निशां नेष्यामि। एकादशे हुने फलाइंगमेल् इति रेलयानेन नक्तं देहलीमासादयिष्यामि। मदर्थं पय एव किञ्चिद्रक्षणीयं यदुपयोक्ष्ये, नान्यद् भोक्ष्ये। अवकल्पयामि त्वं सहाम्बया सर्वथा सुखमास्से। नित्यमभ्युदिया इत्याशासानो विरमाम्यहं वत्सलस्ते तातश्चारुदेवश्शास्त्री॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Late Fee Paid

पोस्ट कार्ड

नाम Dr. Satya Vrat Shastri, M.A. Ph. D.

पता 23 F, Kohlapur Road,
Kamala Nagar,
Delhi — 6.

डाकखाना

ज़िला (दिल्ली)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः

प्रिय सत्यायुष्मानेधि। नभसस्त्रयोदशेहनि

ह्योहं होश्यारपुरे साध्वाश्रमे वर्तिषि, तत्र च वर्तमानोहं प्रो० जगन्नाथेन समगंसि, वृत्तं च किञ्चिद-पूर्वमुपालप्सि। भारतीयशिक्षामन्त्रिमहाभागेन वेदितं प्रतिमासं द्वे शते राजत्यो मुद्रा स्तेभ्यो गवेषणारसिकेभ्यः प्रदास्यन्ते येषां प्रार्थना-पत्रं सुविचिन्त्य तदर्थं नियुक्ता समितिरार्हन्तीं निश्चेष्यतीति तदर्थं च प्रार्थनापत्रद्वयं (द्वयमेव यथावत्प्रपूरणीयं प्रेषणीयं न त्वेकतरमित्यवधेयम्) डा० सूर्यकान्तं द्वारीकृत्य त्वामुद्दिश्य प्रैरिरम्। पत्रप्रेषणसंकेतान्तरस्याभावात्तस्य द्वारीकरणम-वशमकार्षम्। इच्छामि मा स्म वेदीदसौ वृत्तमेतन्मात्रयापि। पत्रद्वये यद्यल्लेख्यं सर्वं तत्सविस्तरं ह्यस्तने मे पत्रे न्यवीविशम्। इष्यते [illegible] अगस्त्यमासस्यादि मे वासरे जालन्धरे प्राप्तिः। तेन कालहरणप्रतिषेधाय व्योम-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम श्री सत्य व्रत शास्त्री एम.ए.

पता आर्य समाज

डाकखाना बूलानाला

जिला बनारस

Banaras.

CC-0. Prof. Satya Vrat Shastri Collection.

वत्सलस्ते जनकश्चारुदेवश्शास्त्री॥

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
१६।७।५३.

प्रिय सत्य, ज्योग्जीव्याश्चिरं चाभ्युदियाः। श्रावणसङ्क्रान्तौ दलद्वयं ते चारा-
णसीतः प्रापि वृत्तं च वेद्यं समासतोऽवेदि। ऐषमो
नैकापि च्छात्रवृत्तिरुपयोज्या समस्ति, निःशेषमुपयुक्त-
त्वात्तासामिति विज्ञाय परं विस्मये, ऽदभ्रं च खिद्ये।
एवं विपर्यासं गतायां नः संभावनायां किं नु नाम शक्यमुप-
पादयितुमिति बहु प्रतर्कयमाणोपि नाहं किमपि व्यवस्यामि।
किं नु खलु शतद्वयं सार्धं वा शतद्वयं रूप्यकाणां मयेतस्त्वत्कृते सम्प्रहेयं
भविष्यति प्रतिमासम्? दुर्भर एष भारः। अत्र विषये निपुण-
मालोच्य सर्वं च भविष्यन्तमर्थविनियोगं समाकलय्य त्वरितं
लेखो मे प्रेरयितव्यो येनाहं साधीयः स्थितिं विद्यां स्वस्थश्च
चेतसि स्याम्। कियाश्चानेहा पी.एच्.डी इत्युपाधिप्राप्तावुप-
योक्ष्यते। किं डी. लिट् इत्युपाध्यर्थेपि त्वया शक्य-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD

THE ANNEXED CARD IS INTENDED FOR THE ANSWER

ADDRESS ONLY

Shri Satya Vrata Shastri
m.a.
C/o
Dr. Surya Kanta
m.a., D.Litt.
Head of the Sanskrit
Department
Banaras Hindu
University
Banaras.

CC-0. Prof. Satya Vrat Shastri Collection.

अहियापुरतः
२९।८।५३

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्यायुष्मानेधि। अद्य चिरं ते वृत्तान्तस्य सम्प्राप्तस्य अपि कल्पतां कलयसि। न खलु ते मानसः क्षोभः कश्चिदस्ति यदेवं स्वोदन्तसम्प्रेषणे सज्जसे (विलम्बस इत्यर्थः, आत्मनेपदं च भाष्यप्रयोगात्साधु)। तेन त्वरितं शरीरस्वास्थ्यमधिकृत्य लेखं प्रेरय यथा वीयान्मच्चेतसो व्याकुलीभावः। अम्बालाख्ये श्रीगान्धिकालेज औपाध्यायकाङ्गीकरणे किञ्चिदभिमनाये। मन्य इदमचिरेण निश्चितं भविता। भूयोप्यहं प्रियेण मिहिरचन्द्रेणात्रार्थे प्रयुक्तः। मयाप्यर्धाङ्गीकारस्त्वावेदित एव। अल्प एव निर्वेशादिविषयः परिशिष्यते विचारः। एष्यति सप्ताहे सर्वं निःशेषमावेदयितास्मि ते। विगतान्यचिन्त [illegible] शास्त्राणि परिशीलय। आचार्यपरीक्षा हि साधिष्ठमुत्तरणीयेत्यवधारय। अनु-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

सन्ध्येय विषय परिवर्तादौ कीदृशी ते
मतिः, कीदृशी वाच संभाव्यतेत्यादि
वृत्तजात सखिलेन निवेदय। अपि
स्वस्त्रा प्रहितं रक्षाबन्धनं काले ऽवाप
इत्यपि क्षिप्रं कथय। इदं सोत्सुकं
जिज्ञासते तेभ्या। अन्यत्सर्वं सुखम्।
इति निरमति वत्सलस्ते जनक-
२ चारुदेव२ शास्त्री॥

पोस्ट कार्ड

केवल पता

नाम श्री सत्यव्रतशास्त्री एम. ए.

पता c/o

डाकख़ाना आर्यसमाज,

ज़िला बुला नाला

बनारस

(U.P.) Banaras P.O.

CC-0. Prof. Satya Vrat Shastri Collection.

Qr No 4,
Rajmahal,
Kurukshetra.
19.5.58.

Digitized by Sarayu Trust Foundation and eGangotri

मान्यास्तात चरणाः,

स प्रश्रयमभिवादये।

अद्य सम्प्राप्य भावत्कं दलं स्वेहसमन्वितम्।
हर्षो मे मानसे तात। सुतरां वृद्धिमागतः॥१॥
प्राह्णेऽद्यैव विदां वर्यः पण्डितो गौरिशङ्करः।
समगंस्त मया सार्कं निरदिक्षच्च मामिदम्।
त्रयोविंशेऽह्नि मासस्य वर्तमानस्य निश्चितम्॥
विश्वविद्यालये वर्षः प्रथमोऽन्तमुपैष्यति।
तत्र वाञ्छामि ते ताता शास्त्रशीलनतत्पराः॥३॥
सदाचाराः सदा सौम्या सदा परहिते रताः।
कुरुक्षेत्रमुपागत्य त्रयोविंशेऽहनि प्रगे॥४॥
सर्वान्समेतान् अन्यान् पठकान् पाठकांस्तथा।
पाययेयुः स्वकं दिव्यमुपदेशवचोऽमृतम्॥५॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

प्रणमः पण्डितस्वास्य
वृच्छ सोद्वाहि [illegible]
तस्मिन्नेव हि [illegible] स्तातो
योगक्षेमौ सुनिश्चितौ ॥
अथ सम्प्रार्थये प्रह्वः
फ्लाइंगयानमुपाश्रिताः ।
द्वाविंशेऽह्नि तातपादा
इहागच्छन्तु निश्चितम् ॥
अतिसाररुजाक्रान्ता
भवत्पौत्री न वर्धते ।
इति वृत्तं निवेद्याहं
संहरामि गिरं स्वयम् ॥८॥

विनीतः
सत्यव्रतः

पोस्ट कार्ड
जवाबी
केवल पता



To

Prof. Charu Devaj
Shastri,
23-F, Kamala Nagar,
Delhi-6

DELHI-6

CC-0. Prof. Satya Vrat Shastri Collection.

अहियापुरतः
Digitized by Sarayu Trust Foundation and eGangotri ९।९।५८

प्रिय सत्य ज्योग्जीव्या नित्यं चाभ्युदियाः।

अद्यैव चिरस्य ते कुशलोदन्तमापम्। यदेवं चिरात्पत्रं प्रेरयसि तन्न साध्वाचरसि। प्रवृत्त्यभावे कीदृशो ममाबाध आशङ्का वेति किं न वेत्थ? संशोध्य पत्राणि यान्यविदं तानि त्वरितं साधूकृत्य प्रतिप्रहेष्यामि पुण्यपत्तनं प्रति। प्रियेण सुहृदा श्रीभगवद्दत्तेन यदकथि तत्सम्प्रति विमर्शपदवीमध्यास्ते। तत्र सहसा न किमप्युद्गरणीयम्। रभसकृतः सङ्गरो हि महते

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

Dr. Satya Vrat Shastri
M.A., P.S.
4, Rajmahal,
Kurukshetra P.O.
(Distt. Karnal)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
१६।२।५४

प्रिय सत्य ज्योग्जीव्या नित्यमभ्युदियाः।

अद्य प्राह्णे कुशलोदन्तं ते प्रापं वरं च प्राहृषम्। प्रियैः सुहृद्भिश्च समगंस्थाः सुखं चाशिष्ठा इति च प्रामदम्। अतीते भट्टारकवासरे ते लेखो ह्यावूनपत्ते प्राकाश्यं नागादिति न ते तत्प्रैरिरम्। भविष्यति तु भविष्यत्यस्य प्रकाशनमिति निश्चितमवेहि। तेन तत्र सम्यक् तत्सम्प्रेषयितास्मि। इतः पूर्वं पत्रद्वयं त्वदुद्देश्यकं यदिह सम्प्राप्तं तत्पण्डितश्रीशुकदेवमहाभागान्द्वारीकृत्य वाराणसीं प्रति प्रस्थापितम्। मन्येऽचिरादेव ते हस्तगतं भविष्यति। एतस्मिन्पत्रद्वय एकतरं शर्मण्यदेशादागतमितरच्च जयपुरतो लेखाधिकरणकम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



पोस्ट कार्ड

केवल पता

INDIA P

नाम Shri Satya Vrat Shastri

पता 123, Birla Hostel,

डाकखाना Hindu University

ज़िला Banaras

(U.P.)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहिच्छत्रतः
१०.८.२४

प्रिय सत्यायुष्मानेधि,

इदानीमवाप्तं ते पत्रं द्वितीयम्। प्रथमं त्वम्बालये चिरगतमिह स्थानं च मया दत्तोत्तरं तिष्ठति। इदानीं सह तेऽम्बया पञ्चमेऽहनि प्रातस्तरामेनागन्तुम्। तदहरेव ते लेखमुत्तरं प्रापय त्वं तत्पश्चिमार्धया सूत्यः कार्ये स्वे निरत इति पदं निर्दिशोमि। काले सम्प्रेक्षिष्यते कुत्रचिदिति तत्र वेतु ते संज्ञाश्चेतरः। [illegible] [illegible] [illegible]

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

उडमुडत:
२१।४।५४

प्रिय सत्यव्रतायुष्मानेधि, अधिगतं मया होश्यार
पुरस्थेन कुञ्चिकासमन्वितं त्वत्पत्रकम्, अव-
गतं च वृत्तम्। अद्य प्राह्णे बहु यतमानेनापि मया
द्वे ते पुस्तके भारतीयं दर्शनम्, मार्टिनकृतमिङ्गलेण्डे
तिहासश्चेति नावाप्ते। भूयोपि मार्गिष्ये। किंच
गेहं नोद्यापि पण्डितद्वय्या नाध्युषितमवक्रेतु-
कामयापि। तत्र Hand-pipe इत्यस्य वैकृतमेव
कारणतामयात्। तेन तत्सुष्ठू करणीयमिति
मयाऽत्र द्वाविंशमप्यहः स्थेयम्। तेन समाहिते

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
जूनमासस्य प्रथमेहनि।

प्रिय सत्यायुष्मानेधि।

प्राप्ते ते पत्रं लेखश्च।

श्रीदेवदत्तः शास्त्री रविवासरे शिमलां नोपागादिति चित्रीये खिद्ये च। शनौ स मया समगत। शतं मुद्राः पुस्तकचतुष्टयं चाहं तस्मा आर्पिपं व्यश्वसिषं च काले तत्सर्वमविकलं त्वामाप्स्यतीति। न जाने किमापतद्यत्तस्य तत्र दिने प्रस्थानं व्यरुणत्। प्रियो धर्मसिंहेऽम्बालयमायियासतीत्युदन्तस्तेन शुक्रवासरे विद्युद्वार्तया लब्धः। तमुदीक्षमाणः स स्वं प्रयाणं व्यलम्बयत्तुताहो अन्तरायान्तरमभूत्। अस्तु तं जनमनुयुज्य जाने का वस्तुस्थितिरिति। इमं च ते लेखमादित आन्त-

कृतिः शैक्षस्य लोकस्य प्रत्ययोऽयं ममान्तरः ॥५॥

CC-0. Prof. Satya Vrat Shastri Collection.

मधीत्य श्रीभारद्वाजाय दास्यामि
सोऽस्येष्टां प्रतिलिपिं कारय-
त्विति। पश्चाच्छ्रीदेवराजं सूदो-
पाह्वं द्रक्ष्यामि प्रेरयिष्यामि चैव
निबन्धष्ट्रीव्यूनपत्रेषु प्रकाश्यता-
मिति। अतीते रविवासरे खन्नास्थे श्री-
सरस्वती संस्कृतकालेजे मदधिष्ठितः पारि-
तोषिकवितरणोत्सवोऽभूत्। यत्र समये
हं होरां संस्कृतेन छात्रानुपाध्यायांश्चा-
ऽऽभाषे। इह सर्वं सुस्थं सौस्थ्यं वै तेऽभि-
लष्यन्विरमाम्यहं वत्सलस्ते तातश्चारु-
देवश्शास्त्री॥

POST CARD
REPLY.
ADDRESS ONLY
CAMP P.O. E.P.
JUN 5 4
Shri Satya Vrata Shastri,
c/o
Shri Madan Mohan Varma,
Blairathal
Lower Flat,
Simla — Sach.
H.O.

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बाला छावनी
२।३।५४

श्रीमान् जी, शब्दापशब्दविवेक के उत्तरार्द्ध की समाप्ति पर इन नीचे लिखे छः श्लोकों को कम्पोज करके प्रूफ मेरे पास भेज दें। आप का — वासुदेव शास्त्री ॥

इत्थं विवेचिते शब्दानां साध्वसाधुनी।
विनेयानां प्रबोधाय विनोदाय च तद्विदाम् ॥१॥
यद्यमीभ्यः स्वदेतेयं हारिणी हृदयङ्गमा।
विवेचना प्रसन्नेति सकामः स्यामहं तदा ॥२॥
तेनेति मेऽर्थना नम्रा दोषज्ञा वीतमत्सराः।
कृपया पश्याऽऽविष्टा विमृशन्तु क्रियामिमाम् ॥३॥
न वैदुष्येऽभिमानो मे कर्मण्य न प्रयोजकः।
न च दोषैकदृक्त्वं तु प्रतित्सा केवला मता ॥४॥
वाचामपस्किरां कां चिद्दियमाधास्यति ध्रुवम्।
कृतिः शैक्षस्य लोकस्य प्रत्ययोऽयं समान्तरः ॥५॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
२६।२।५४

प्रिय सत्यायुष्मानेधि ।

पत्रं ते ऽधिगतमवगतं च वृत्तम् । अपेक्षितानि पुस्तकानि शतं रूप्यकाणि च श्री-देवदत्तशास्त्रिणं द्वारीकृत्याचिरेण प्रहेष्यन्ते । स हि रविवासरे ऽस्य मासस्योपान्त्ये दिवसे शिमलां यियासति । मन्ये ऽयमेव प्रथमः कल्पः । धनादेशेन द्वाराऽपि दिवसद्वयं दिवसत्रयं वा व्यतेष्यति यावत्तद्धनं ते हस्तमुपैति तानि पुस्तकानि वा त्वत्सान्निध्यं लभन्ते । द्रव्यविनियोगश्च परिहृतो भवति । इदानीं सर्वथा प्रकृतिं प्रत्यापन्नस्त्वं स्वे कार्ये ऽनन्यमनसा स्मस

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



POST CARD

REPLY

ADDRESS ONLY

Shri Satya Vrata Shastri,
C/o
Shri Madan Mohan Varma,
Bhairavthal
Lower Flat,
Simla — East

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



POST CARD

THE ANNEXED CARD IS INTENDED FOR THE ANSWER

ADDRESS ONLY

SAVES T

INDIA

9 JAN

DELY.

Shri Satya Vrata Shastri
M.A.
c/o
Shri P.N. Srivastava,
Arya Hostel,
Nepali Khapra,
Banaras
(U.P.)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
२८।११।५३.

प्रिय सत्य ज्योग्जीव्या चिरं चाभ्युदियाः।
अद्य ते लेखोऽवापि कृत्यं च तन्निर्दिष्टं व्यधायि।
श्री तुलसीरमणो लवपुर विश्वविद्यालयस्य रजि-
स्टर्डाङ्कमावेदितः सोलनविश्वविद्यालयस्यापी-
ति सो कालहीनं निर्वर्तयिष्यति ते कार्यम् इत्यत्र
वीतचिन्तेन त्वया स्थेयम्। सर्वथा प्रक्रान्तेध्ययने
ऽवहितः स्या येन समीहितसिद्धिः साधीयसी
स्यात्। सततं समीहमानोपि शरीरनिरपेक्षं मा
स्म वर्तिष्ठाः। अम्बा ते त्वामाशीराशिभिर्वर्ध-
यति। प्रतिवचनं प्रतीक्षते जनकस्ते चारुदेव-
श्शास्त्री॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Hans Raj College,
Delhi,
18.7.55.

पूज्यास्तातचरणाः,

सप्रश्रयं वन्दे

सम्प्राप्तोऽहं राजधानीं सकुशलं सम्प्राप्तानि च चत्वारि वस्तूनि श्रीगार्ड महोदयहस्तेन प्रेरितानि। अत्रागारे न तथा साध्वी संव्यवस्थाऽस्ति यथाहमनुमानमकार्षम्। आशासे कतिपयैरेवाहोभिर्गृहान्तरं मार्गिष्यते ततश्च श्रीमन्तोऽपि ससुखमत्र निवसितुं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पारमिष्यन्तीति । प्रन्यत्
सर्वः सुस्थम् ।

वशंवदः
सत्यव्रतः

पोस्ट कार्ड

कार्ड जवाब के लिए

केवल पता

Ambalacantt

नाम Prof. Chorn Devaj Shastri,

पता ~~V & P.O. Ahiapur,~~

Ambalacantt

Via URMAR

डाकखाना

जिला Distt HOSHIARPUR

(HOSHIARPUR)

Punjabi
Mohalla
Ambalacantt

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

12-3, Birla Hostel,
Hindu University,
Banaras.
15. 2. 54.

मान्यास्तातचरणाः

सप्रश्रयमभिवादये

अपरेद्युः सायाह्ने सयोगक्षेमं वाराणसीमागतः सुहृद्वर्यस्य श्रीदेवीदत्तस्य सविध एव सम्प्रति वर्ते। प्रणमित्रद्विवेदो मया सह गन्धीविराम-स्थान एव समागत। तेन सार्धमहं विश्वविद्या-लयच्छात्रावासमागतः। अत्र निवसता स्वसु-हृदा च सबहुमानस्तागोरे निवेशितः सुखं निवसामि। ट्रिब्यून समाचारपत्रं तु न मया क्वचिदप्यधिगतं तेन न जाने मदीयो लेखः प्रकाशं गतो न वेति।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

कुशलमन्यत् ।

वशंवदः —
सत्यः

POST CARD
REPLY.
ADDRESS ONLY

AMBALA DELY
17 FEB 54
8 20 AM

POSTAGE
9 PS
INDIA

Prof. Charu Deva ji
Shastri,
Panjabi Mohalla,
Ambala Cantt.
(Panjab I)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

शिमलानगरीतः
२५. ६-६. ५४

मान्यास्तात चरणाः,

सप्रश्रयमभिवादये

अद्य समाचारपत्रेषु P.C.S. परीक्षायाः परिणामो दृष्टः स्यात्। असाफल्यं भजमानोऽहमनुक्रोशस्यैव पात्रमिति न मयि रोक्ष्यन्ति श्रीमन्त इत्यवैमि। प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापद इति कविभणितिः सर्वथा चरितार्थतां गता। अहर्निशं प्रयस्यापि मया न साफल्यमेत

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

सेवामें,

नाम Prof. Charu Deva Shastri

पता 3 Cross Road,

डाकख़ाना Punjabi Mohalla,

ज़िला Ambala Cantt.

AMBALA CANTT.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

५६, डे होस्टल,
हिन्दू यूनिवर्सिटी
बनारस.
१८.१२.५४.

मान्यास्तातचरणाः,

सप्रश्रयं नतिततयः।

अपरेद्युः प्रियो धर्मपालो वाराणसीं प्राप्तः। समानीतानि तेन राधाकृष्णन् कृत-दर्शनपुस्तकं सार्धसेटकद्वयपरिमितमाज्यं पैण्टाभिधानमधोवस्त्रं देवीदत्तनिबन्धैकश्च। तदिदं सर्वं मे सुखाय।

निबन्धविषये त्विदमेवाभि-धित्सामि यद् यथानिदेशमाचरि-ष्यते मयेति। सामग्रीसमवधानं न

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

'Hindska'
38 Major Bauts Rd.
Lucknow
५.३.५४.

मान्याः श्रीचारुदेवशास्त्रिमहाभागाः।

नमांसि भूयांसि।

उपलब्धं श्रीमतां पत्रम्। श्रीमतां पर्यायवचन-
विवेको नाम निबन्धोऽवश्यं प्रकाशयिष्यते
द्वितीये सम्पुटे। तत्र श्रीमद्भिः काचिच्छङ्का
न कार्या।

इति भवदीयः
को. अ. सुब्रह्मण्य अय्यरः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD

THE ANNEXED CARD IS INTENDED FOR THE ANSWER

ADDRESS ONLY

Prof Charu Deva Shastri

Prof of Sanskrit

G. M. N. College

Ambala (Cantt)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

तमाम् । यदि पुनरे-
तत्पत्र प्राप्तेः पूर्वमेव
प्रहितानि स्युस्तथापि
न दोषः ।

तत्र भवन्तो ग्रिम-
स्य मासस्य प्रारम्भ-
एव होश्यारपुरं जिग-
मिषन्तीति पूर्वमेव
विदितमासीत् भवत-
पत्रान्तरेभ्यः । अहमपि
होश्यारपुरं यियासामि
आचार्याणां शङ्कापनो-
दायेति विदाङ्कुर्वन्तु
श्रीमन्तः । परं न तत्र चिर-
तरं तिष्ठासामि । मन्ये
प्रथमे द्वितीये वाहनि भव-
द्भिः संगंस्य इति विनिवेद्य
विरमामि — मन्योऽहम् ॥

पोस्ट कार्ड

केवल पता

HIMAD UNIVERSITY 27 MAR 54 12.45 PM BANARAS

नाम Prof. Charu Deva Shastri,

पता 3 Cross Road,

डाकखाना Panjabi Mohalla,

ज़िला AMBALA CANTT

(PANJAB)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

१२३, बिरला होस्टल,
हिन्दू यूनिवर्सिटी,
बनारस.
२५. ३. ५४.

मान्यास्तातचरणाः,

सप्रश्रयमभिवादये

अपरेद्युरेव श्रीचरणानुद्दिश्य पत्रमेकं प्रैरिरं वृत्तं चेदृत्यं सविस्तरमुपा~~स्थाय~~ तिष्ठिपम् । स्वास्थ्यं तु मेतदवस्थमेव । पत्रप्रेषणे यदचिरायिषि तत्र कार्य्यवैयग्र्यमेव हेतुः । किञ्चेदं प्रार्थये न पूर्वप्रार्थितानि पञ्चाशद् रूप्यकाणि प्रहेयानीति । इतस्तत एव किञ्चिद् ग्राहिष्यते कार्य्यं च निर्वाहिष्यत इति न तान्यपेक्ष्यन्ते —

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

c/o Shri P.M. Dwivedi,
Arya Hostel,
Nepalikhapra,
Banaras.
1st Dec, '53.

पूज्याः पितृचरणाः,

सप्रश्रयमभिवादये

अपरेद्युरेव सम्प्रापं श्रीमतं पत्रद्वितयम्। श्रीतुलसीरमणो मम रजिस्टर्डाङ्कमावेदितः इति निर्वृणोमि। मन्ये ममावेदनपत्रं सम्प्रति सकलाङ्कसम्पूर्णं स्वीकरिष्यते विश्वविद्यालयाध्यक्षैरुपाधिश्च मे वितरीष्यत इति।

यद्यपि वाक्यपदीयं प्राधीतोऽस्मि तथापि ग्रन्थबाहुल्यं मनसि कृत्यमनागुद्विग्नोऽस्मि। सकलमपि द्वितीयं काण्डमल्पेनैवानेहसा समापनीयं येनाकृतयर्थमपि कालो लभ्येतेति महान्कार्यभरो मया च गुरुजनैश्चोद्बुद्धः। द्वितीयकाण्डेऽकृतभूरिपरिश्रमा मे गुरुचरणा इति नाप्रतिहते प्रवर्तते ऽध्ययनम्। यो हि विषय इदम्प्रथमं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Varanasi,
10/10/60

My dear Satya,

That you are confirmed is the happiest news of the week. Now you can attend to Research, relieved of disturbing thoughts of uncertainty and insecurity. The other day I saw Shri Subrahmanya Iyer, Vice-Chancellor of the Sanskrit University. He wants you to go ahead with the preparation of a critical edition of the Padamañjarī. He thinks that publishers would not be wanting, when the work is ready. He would soon send you his opinion on the Bodhi-Sattva-Caritam. He wishes Usha well. He also asked me if Usha was in service. In reply I told him she left service some time ago. I sent Rs 2/- to

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

INDIA

Dr. Satya Vrat Shastri
M.A., Ph.D.
3/54, Roop Nagar,
Delhi — 6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Ahiya Pur B.O.
11/4/66.

प्रिय सत्य,

आयुष्मानेधि।

अद्य सत्कमेव पत्रद्वयं तेऽवाप्तम्, वृत्तं चावगतम्। पत्रद्वये निर्दिष्टानि हिन्दीसंस्कृतपुस्तकानि यतिष्ये सहादातुम्। चतुर्दशे हनि नक्तं शक्ष्यामि देहलीमुपैतुम्। तेन पञ्चदशे हनि मान्याः श्रीवासुदेवमहाभागा देहल्यां स्वां स्थितिं विलम्बयेयुस्तदा संभावयिष्याम्यात्मानं पावनेन तेषां दर्शनेन समुत्कक्ष्यामि च तैः सम्भाषणेन। पञ्चदशेहनि प्रातरेव त्वरिष्ये तान्द्रष्टुम्। सत्याग्रहपुस्तकं देहल्यामेव गेहे वर्तत इति तत्र वीतचिन्तोस्मि। नित्यमभ्युदयं ते कामयमानोहं विरमामि तातस्ते चारुदेवशास्त्री॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

साथ का कार्ड जवाब के लिए

केवल पता

INDIA 9 पै

नाम Dr. Satya Vrat,

पता 23F, Kolhapur Road,
Kamla Nagar,

डाकख़ाना Delhi - 6

ज़िला DELHI - 6.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

क्वार्टर नं० ४,
राजमहल
कुरुक्षेत्रम्
१९.४.५८.

मान्यास्तातचरणाः,
सप्रश्रयमभिवादये।
मया पूर्वमपि पत्रद्वयं प्रहितमासीत्परं
नाद्यापि प्रतिवचः प्रापीति चिन्तातुरं चेतः।
नैवं पितृपादाः पुरा कदाप्यचिरायन्तेति
भूयोऽप्युद्वेजयति मे मनः।

उषा एकविंशे वासरेऽस्य
मासस्य बाम्बे एक्सप्रेसरेलयानेन
देहलीं प्रति प्रस्थास्यते सायाह्ने
एकोनविंशतिकलाधिकाष्टवाहन-
वेलायां देहलीमुपैष्यति। गन्त्री-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



विरामस्थानमुपैत्य
स्वयं सा गृहाना-
नेतव्येति साञ्ज-
लिबन्धं प्रार्थये।

कुशलमन्यत्।

विनीतः —
सत्यव्रतः

पोस्टकार्ड

POSTAGE
INDIA

Prof. Charu Devaji Shastri,
23-F, Kamala Nagar,
Delhi-6

DELHI-6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

23F, Kamala Nagar,
Delhi.
12.XII.56.

मान्यास्तातचरणाः,

सप्रश्रयमभिवादये
सम्प्राप्ति भवतां दलं वृत्तं चाप्यखिलं
विदितम् । श्रीमन्तो द्वाविंशे दिवसेऽस्य
मासस्य देहलीं प्रत्याविवृत्सन्तीति प्रियं मः।
अद्याचिरं भवदागमनमुदीक्षमाणयोरावयोः।
श्री हीरालीलेन यदुक्तं तदवितथम् । अतीतानि
पञ्चशाण्यहानि पुनरपि तस्याः कन्यकाया
माताऽस्मद्गृहमुपागात्, बहु च समलापीत्
तस्याः कन्यकायाः पिता तु जनवरीमासे
देहलीमागमिष्यतीति तया भणितम् ।
अस्तु । मातृचरणामयं सन्देशः — अहिपापुरे
स्वगेहके छद्मौ यन्मृदादिकं प्रक्षेप्यं तत्प्रक्षेपं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



पोस्ट कार्ड
जवाबी
केवल पता

नाम Prof. Charu Deva Shastri
पता V.V.R.I., Sadhu Ashram, Hoshiarpur
डाकख़ाना
ज़िला HOSHIARPUR (Punjab)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

श्रीः

८८३. गोविन्दगढवीथी
जालन्धर नगरम्
४।३।५७

स्वस्ति,

विद्वद्वरं श्रीचारुदेवशास्त्रिणं सदयितं सविनय-
बहुमानं विज्ञापयति— आयुष्मतः श्रीसत्यव्रतस्य दारपरिग्रह
महोत्सवे सन्निधानाय निमन्त्रणमधिगतम्, अनेकान् धन्य-
वादान् प्रत्यर्पयामि। चिरादाशास्यमानेनानेन हृदयहारिणा वृत्तान्तेन
यत्सत्यमस्मि परां प्रीतिमुपगतः। दिष्ट्या वर्धते भवान् सद्वितीयो
मङ्गलमयेनामुना पुत्रपरिणयेन॥ तत्र उपस्थातुं जातस्पृहोऽपि कार्य-
वशाद् वपुषः शैथिल्याच्च न शक्नोमि तथाकर्तुमिति क्षन्तव्योऽस्मि।

मत्प्रतिनिधिना भवतैका युष्मन्तौ नवौ दम्पती—
अनयाशिषा संभाव्यौ— "इहैव स्तं मा वियौष्टं विश्वमायुर्व्यश्नु-
तम्, क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे दमे"— ऋग्वेदः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

उद्वाहविधौ निष्प्रत्यूहतां
आदरणीयः
श्रीपरमेश्वरानन्दः

पोस्ट कार्ड

केवल पता

नाम श्री पं. वासुदेव शास्त्री एम.ए.

पता २३. एफ. कमला नगर

डाकखाना देहली

ज़िला 23. F. Kamala nagar
Delhi

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

साध्वाश्रमतः
१०/११/५६

प्रिय सत्यव्रतायुष्मानेधि।

प्राप्तं ते पत्रं बृहत्तरं भारतं जातकश्च कथा सङ्ग्रहश्च। श्रीविद्यनिधेर्मद्उद्देश्यकं पत्रं चाप्यधिगतं तदभिप्रेतं च। न जाने कस्मादसौ वारितोपि भूयः पद्यप्रणयनादभिनिविशते तत्रायास साध्ये कर्मणि। अस्तु। भूयोपि वारयिष्यामि। श्वः शोध संस्थानपरिषदो वार्षिकं मेलनमिति व्यग्रा आचार्यवर्या इति सोमवासरे तान्[illegible]यिष्याम्युभावपि ते सन्दर्भौ। लूधियानास्थो [illegible]र महाभाग उदीक्षते तत्र समागमं सोत्सुकम्। एतदर्थोऽ मुष्य लेखो मयाऽतीतेष्वहुःस्वापि। प्रियधर्मपालस्यापि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

मामुद्दिश्य विन्यस्ताक्षरं पत्रमितो द्वितीये
तृतीये वा वासरे ध्यगामि । तेन संगत
एवाहं डाक्टरमहाभागं द्रक्ष्यामि । इद-
मिदानीं व्यवसितमष्टादशेऽस्य मासस्य
दिवसे रविवासरे लुधियानां मध्याह्ने
प्राप्तास्मीति । सर्वं तत्रत्यं वृत्तं यथावद
उपलभ्य पत्रमारोप्य त्वां हारयिष्यामि
याथार्थ्यविदे कृत्यप्रतिपत्तये च । सर्वथा
शरीरेऽवहितो भवेति भूयो भूयः प्रयुञ्जानो
विरमति वत्सलस्ते तातश्चारुदेवश्शास्त्री ॥

पोस्ट कार्ड

केवल पता

नाम Dr. Satya Vrat Shastri, M.A., Ph.D.

पता 23 F, Kohlapur Road, Kamala Nagar,

डाकखाना Delhi — 6

जिला

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयत:
१।८।५५

प्रिय सत्य ज्योग्जीव्यानित्यं चाभ्युदिया:। ह्यस्ते पत्रमेकं प्रैरिरम्
अद्यापरं प्रेर्यते। श्वो मङ्गलवासरे नक्तं फलाइंगमेल इत्या-
ख्येन रेलयानेन देहलीमाप्स्यामीति वेदितव्यो ऽर्थ: पुनरा-
वेद्यते विश्वासदार्ढ्याय निश्चितेरहार्यत्वप्रख्यापनाय वा।
शिष्टं पुनरुपेत्यैव वक्तास्मीति विरमामि, रेलयान-
विरामस्थाने च ते ऽवस्थितिमिच्छाम्यहं वत्सलस्ते तात-
श्चारुदेवश्शास्त्री॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयत:
१६/१/५२

प्रिय सत्यायुष्मानेधि । इतः कतिपयेष्वहःसु लेखं तेऽवाप्नवम् । इतः प्राग् यत्प्रतिवचो नादां तत्र शीतकतैव हेतुः । प्रियसखेन ते श्रीदेवीदत्तेन यदहोश्यारपुरस्थे सनातनधर्मकालेजे औपाध्यायकमभ्युपेतं ताऽस्य क्षिप्रकारिता । तत्र नियोगिनो नियमेन निर्वेशं न लभन्त इति कदाचित्तत्र गतोऽहं नियुक्तस्य कस्यचिन्मुखादेवाश्रौषम् । अन्यथाप्यस्य विद्याशालस्याऽकलुषा कीर्तिर्नास्ति । छात्रसङ्ख्या खल्वपि नोत्सहजननी, संविधिरपि सर्वः सामान्यतो

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयत:
१७।३।५५

प्रिय सत्यायुष्मानेधि। पत्रं ते धिगतं सव्याख्यम्।
नितान्तं दुरवधारोप्ययं दिग्रूपोर्थो यथामति व्याख्याय
त्वत्प्रहितैर्व्याख्यानैः कृतसाचिव्येन मयाऽवश्यं
सोमवासर एकोनविंशेहनि प्रहेष्यत इति व्यवसितोस्मि।
तत ऊर्ध्वं कालोधिको न शक्योतिक्रमितुं नूतनेन लेखेन
यतः सर्वा सामग्री साधीयः सम्पादनीया, असकृच्च परा-
मर्शनीया, मा भूत् क्वचित् किञ्चित्स्खलितम् इति।
कृतेपि महति यत्ने निबन्धोऽयं विंशतिं पत्रपार्श्वा-
न्येवाभिव्याप्स्यतीति जाने। टाईपाक्षरैरुपनिबद्धस्त
कलया भूयांसीति मन्ये। कालविषयको निबन्धः किं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
१८।८।५५

प्रिय पुत्रकायुष्मानेधि,

अधिगता ते विद्युता वार्ता पत्रेण च, अवगतं चावगम्यं वृत्तम्। अस्तु। यथा प्रथमं चिन्तितं तथा ऽऽदित्यवासर एव मध्याह्ने द्वादशनादमितायां वेलायामितः प्रस्थायिना रेलयानेन प्रयास्यामः, सायं षण्नादमितायां च देहलीमाप्स्यामः। प्रतीमश्च तावता कालेन गेहमधिवासार्हतां यास्यतीति वक्तव्यं निःशेषयन्विरमति वत्सलस्ते तातश्चारुदेवश्शास्त्री ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



पोस्ट कार्ड

केवल पता

9 PS INDIA 9 PS

नाम श्री सत्यव्रत शास्त्री एम.ए.

पता एम.ओ. ऐल, व्याकरणाचार्य
संस्कृताध्यापक

डाकखाना हंसराज कालेज

ज़िला मल्का गंज
दिल्ली

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयत:
२५।७।५५

प्रिय सत्यायुष्मानेधि,

वृत्तं तेधिगत्यपरं पर्यतुषम्।
यदन्तेवासिन: सर्वथा समतूतुष इति तत्त्वयि संभाव्यमेव।
अवश्यमन्तराऽन्तरा संस्कृतेन तेभिसम्बोध्या यथा
ऽऽवर्जिततरा: स्यु:। अस्तु त्वदपेक्षितानां पुस्तकाना-
माहरणायाद्य निशीथिन्यामितो हियापुरं प्रस्थास्ये
श्व: प्रातरेव च तं प्रदेशमासादयिष्ये। बृहस्पति-
वारे नक्तं तत आवर्त्स्यामीति व्यवस्यामि।
अत्रान्तरे यदि पत्रं लेख्यं तर्ह्यहियापुरं प्रत्येव तत्
प्रेरणीयम् इति प्रयुञ्जानो विरमति वत्सलस्ते

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



पोस्ट कार्ड

जवाबी

केवल पता

नाम श्री सत्यव्रत शास्त्री एम० ए०
एम्० ओ० एल०, व्याकरणाचार्य

पता संस्कृताध्यापक,
हंसराज कॉलेज

डाकख़ाना दिल्ली

ज़िला

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयत:
१९।६।५५

प्रिय सत्यायुष्मानेधि, ह्यस्ते पत्रं प्रैरयम्, अद्य पुनरपरं प्रेरयामि। मातुस्ते शरीरं दुःस्थतरमजनीति न शक्यते मया तया सममितो हियापुरं प्रति प्रस्थातुम्। तेन सति कस्मिंश्चिद्विशेषे द्वित्रैरहोभिरेकक एव प्रस्थाताहे चतुष्पञ्चांश्च वासरांस्तत्रावस्थाताह इति तावद् व्यवसितम्। तस्मात् त्वया गृहान्वेषे यत्नो विधेयः। सम्प्राप्ते साधीयसि सद्मनि देहलीमेवेतः प्रस्थातास्वहे। नार्थो हियापुरे वासेन। यदि मासान्तादा वासार्हस्य निलयस्य सम्प्राप्तिः स्यात्तदा सर्वं सुस्थं स्यात्। वृत्तं ते प्रतीक्षमाणो विरमति

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
२३/६/५३.

प्रिय सत्यव्रत ! आयुष्मानेधि ।

अद्याहर्गणः पत्रोत्तरं प्रति-
पालयतो मे । न जाने कस्मादेतावन्तमनेहसमत्रार्थे व्यल-
म्बिष्ठाः । अद्यापि पत्रं ते नापीति भूयो विवक्षितं विन्यसितुमीहे ।
अवश्यं त्वया त्वरितं लेखो मे प्रेर्योहं चावेद्यः कियांस्ते मासिको
व्ययो भविष्यतीति येन तावतोर्थस्य संविधा क्रियेत । इदं चा-
परं जिज्ञासे च्छात्रावासे वासो लब्ध उत नेति । कदाऽसौ
लब्धेत्यस्ति काचित्प्रवृत्तिः ? माधवस्त्वाह स्वके पत्रे सिता-
म्बरमासादूर्ध्वं तत्र वासावाप्तिः संभाव्यत इति । किमिदं
तेन स्वत एवोत्प्रेक्षि कार्यकारणे विचिन्तयमानेनाहोस्वित्
त्वयैवेदं तस्मा अकथीति । यद्युत्तरः पक्षः, तर्हि कथं वारं मासद्वयं
सुखं नेष्यसीति चिन्ता मां बाधते । डाक्टर महाभागा अत्रविषये
निभृतं प्रार्थ्याः । अवश्यं ते यथेष्टमुपकरिष्यन्तीति प्रत्येमि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
२३/६/५३.

प्रिय सत्यव्रत ! आयुष्मानेधि ।

अद्याहर्गणः पत्रोत्तरं प्रतिपालयतो मे । न जाने कस्मादेतावन्तमनेहसमत्रार्थे व्यलम्बिष्ठाः । अद्यापि पत्रं ते नापीति भूयो विवक्षितं विन्यसितुमीहे । अवश्यं त्वया त्वरितं लेखो मे प्रेर्योहं चावेद्यः कियांस्ते मासिको व्ययो भविष्यतीति येन तावतोर्थस्य संविधा क्रियेत । इदं चापरं जिज्ञासे च्छात्रावासे वासो लब्ध उत नेति । कदाऽसौ लब्धेत्यस्ति काचित्प्रवृत्तिः ? माधवस्त्वाह स्वके पत्रे सिताम्बरमासादूर्ध्वं तत्र वासावाप्तिः संभाव्यत इति । किमिदं तेन स्वत एवोत्प्रैक्षि कार्यकारणे विचिन्तयमानेनाहोस्वित् त्वयैवेदं तस्मा अकथीति । यद्युत्तरः पक्षः, तर्हि कथं वारं मासद्वयं सुखं नेष्यसीति चिन्ता मां बाधते । डाक्टर महाभागा अत्र विषये निभृतं प्रार्थ्याः । अवश्यं ते यथेष्टमुपकरिष्यन्तीति प्रत्येमि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

नागरीप्रचारिणीपत्रि= 123, Birla Hostel,
यायां त्वकीयलेखस्वीकृतिविषये B. H. U. Banaras
लेखिषं नाप्तं श्रीमद्भिः। मल्लेखविषये 5. 3. 54.
श्वः सूचयितास्मीति विरम्यते॥

मान्यास्तात चरणाः,

सप्रश्रयमभिवादये

अपरेद्युरेव सायाह्ने पत्रमवापि
प्यशेषतोऽवेदि। समाचारपत्रे प्रकाशि
मल्लेखस्य तिस्रः प्रतिलिपयोऽप्य
सर्वमिदं प्रियं मे। आचार्यविश्वबन्धु-
शास्त्रिभिरभिनन्दितो मे लेख इति किञ्चित्
सुखितोऽस्मि। यदि ते संशोधनादिकं
वितत्य निर्देष्टुं न पारयेयुस्तर्हि होश्या
पुरं गत्वैव सर्वं संसाध्यं भविष्यति। किन्वेदं
पश्यामि कालविषये भूयसी सामग्री मया
संकलितेति तस्या अप्युपयोगो [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

इति। तेनहि निबन्धस्योप-
योगित्वं परिवर्धिष्यते।
मया म्रालय नगरनिवा-
सिनः सुहृदः सकाशात्
P.C.S. परीक्षायाः प्रश्न-
पत्राणि बहोः कालात्प्रा-
गादादिषत। तानि मम
वाराणसी प्रस्थानात पूर्वं
श्री भारद्वाजेन सनातनधर्म-
कालेजे संस्कृताध्यापकेना-
ग्राहिषत। तानि तेन निव-
र्तितानि न वेति नाहं वेद।
[illegible] निवर्तितानि तर्हि
[illegible] त्वरित प्रत्यावर्त
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

POST CARD

[illegible] CARD IS INTENDED [illegible] THE ANSWER

ADDRESS ONLY

8 MCH
9 AM
~~1954~~
10

INDIA

Prof. Charu Deva Shastri,
3 Cross Road,
Panjabi Mohalla,
Ambala Cantt
(PANJAB

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
३१।७।५३.

प्रिय सत्य! आयुष्मानेधि। अद्यैव ते पत्रमधिगतं वृत्तं चावगतम्। स्थाने व्याकरणाचार्यपरीक्षायां सर्वात्मना समुद्युङ्क्षे। अहं रजिस्ट्रारमहोदयं प्रति पत्रं प्रेरयिष्यामि प्रष्टव्यं च प्रक्ष्यामि। दुर्भरो व्येष भारः कथंचिद् वक्ष्यत इत्यत्र चिन्तां मा गाः। स्वे कर्मणि सततमवहितो व्याप्रियस्व। मा ते ऽन्यच्चिन्त्यं भूत्। यन्मया पत्रद्वये प्रहितपूर्वे कृत्यं निरदेक्षि तदह्नाय समनुष्ठेयं कालहरणप्रतिषेधाय व्योममार्गेणोत्तरं प्रहेयमिति च प्रागेवावेदि। सविस्तरं कालान्तरे वक्ष्यामीतीहैव विरमामि। रूप्यकाणि (सार्धं शतम्) अद्यैव धनादेशद्वारा

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयत:
२२।२।५४

प्रिय सत्यायुष्मानेधि। अद्यैव ते वार्तामधिगत्य सौस्थ्यं मे चेतसोऽजनि। प्रसन्नास्त्वयि डाक्टरमहोदया इति परो मे परितोषः। जयपुरात् प्राप्तं पत्रं मया पत्रान्तरेण सहैवाकालहीनमितः प्रेरितं तत्कुतो नालम्भीति न सुग्रहम्। सम्पादकसुतेन तत्रोक्तं दीर्घो निबन्धो वैदुष्यपूर्णश्चेति पञ्चमेऽङ्के प्राकाश्यं यातेति। अत्रापि रविवासरे न ते लेखष्ट्रिब्यूनपत्रे प्रकाशितो भूत्। अद्य भूयोऽपि मया ट्रिब्यूनकार्यागारमुपेत्य वस्तुस्थितिः पर्यचायि। विलोकितं च योजिताक्षरश्चासौ लेखः पत्रे संनिवेशं प्रतीक्षते, प्रत्यायितश्चाहं श्रीसूदमहाशयेनागामिनि रविवासरेऽवश्यं प्रकाशयिष्यत इति। तेन नात्र चिन्ता कार्या। गुरुलाघवचिन्ता-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयत:
१०।१२।५३

प्रिय सत्यायुष्मानेधि ।

पञ्चदशे षोडशे वाहनीह सम्प्राप्तासीति प्रियङ्करं नः। यावन्ति ते वसनान्युपयोग मलिनानि जातानि तानि सहानेयानि येनेह निर्विक्रानि भवेयुः। लौही मञ्जूषाऽऽज्यधानी च सहादेवे। इमामिहैव विहास्यसि परां च बृहत्तरां ग्रहीष्यसि बहुतरार्थसमावेशिनीम्। अपि मुद्रणयन्त्रालयाधिपो दृष्टः? यदि दृष्ट इत्यात्थ, तर्हि ब्रूहि मुद्रणव्याक्षेपं पृष्टः स किमाह? मया तु शब्दापशब्दविवेकोत्तरार्द्धोपि पर्यवसायितः। निदानीं किमप्यवशिष्यत ऋते मुद्रणात्। तत्र च परवन्तो वयम्। तेन किं वा शक्यं कर्तुमन्यत्र प्रेरणायाः। अतो भूयो भूयः स मुद्रणालये स्वामी

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम Shri Satya Vrat Shastri
M.A., M.O.L.

पता c/o

डाकखाना Shri P.N. Dwivedi,
Arya Hostel,

ज़िला Nepali Khapra
Banaras
(U.P.)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

तस्यावस्थितिः स्यादिति 59 De Hostel;
प्रत्येमि। कुशलमन्यत्। पूज्येभ्यो B. H. U.
मातृचरणेभ्यो निवेदनीयो मम
प्रणामाञ्जलिः —— सत्यव्रतः॥ Banaras.
21.12.54.

मान्यास्तातचरणाः

सप्रश्रयमभिवादये

प्रतीतानि पञ्चषाण्यहानि पत्रं प्रेषितवतो मम। परमथापि तत्प्रतिवचो नाप्तमिति पुनः प्रेषणे दलस्य मनो दीयते। दिक्कालविषयावधिकृत्यैव प्रवर्तनीयः स्वको लेख इति डाक्टरसूर्यकान्तमहोदयानां परामर्शः। यद्यपि स्वल्पः कलेवरो भविष्यति निबन्धस्य तथापि किं नाश्छिद्यते। वस्तुतत्त्वनिरूपणेनैवास्माकं प्रयोजनं न तु कलेवर—

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

वाराणसीतः
१।११।६०

प्रिय सत्यायुष्मानेधि। पत्रं तेऽविदमवेदिषं च वृत्तम्।
अव्यवहितपूर्वे रविवासरे तद्गृहानुपेत्य डा० सूर्यकान्त-
महाभागानपश्यम्, कञ्चित्कालं च तैः संलप्य स्व-
मावासमावृतम्। अत्र दर्शने तु नैतै र्बह्वप्रकृतं जल्पि-
तं न वा नोऽनभिमतमरुन्तुदं वा कटाक्षितम्। मया
च मात्रयापि न पिशुनितं कं कालमत्र स्थातास्मीति।
अद्यैवाभिजानामि शक्तिनगरे चतुरहं कृतावस्थानै रमी-
भिर्महाशयैः किञ्चित्पुस्तकं स्वयमेवास्माननुमान्यैवा-
स्मत्पुस्तकसङ्ग्रहादुद्धृतं स्वे समुद्गके च सन्निवेश्य
वाराणसीं प्रस्थितैः सहानीतम् इति। वयं गृहादि-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



पोस्ट कार्ड
POST CARD
साथ का कार्ड जवाब के लिए
THE ANNEXED CARD IS INTENDED FOR THE REPLY
केवल पता
ADDRESS ONLY
POSTAGE
INDIA

Dr. Satya Vrat Shastri
M.A., Ph.D.
3/54, Roop Nagar,
Delhi—6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

If one of them refuses to ~~3 Cross Road~~ examine the name of the third may be taken up. ~~Panjabitud~~

58, De Hostel,
B. H. U.
19.4.55.

पूज्याः पितृचरणाः

सप्रश्रयं नतितत्तयः

अपरेद्युरेव पत्रं प्रैरिरं पुनरद्य च प्रेरये। मन्ये ह्यो धर्मपालोऽपि श्रीमद्भिः समगतेति। तेन येषां परीक्षकाणां नामानि सूचितानि स्युस्तानि इत्थं परिवर्त्यानि। अद्य डाक्टरमहोदयैर्निश्चयात्मिका परीक्षक नामावली (Final list of ~~[illegible]~~ examiners) प्रेषिता। सा चेत्थमस्ति —

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

(i) Dr. C.P. Ramaswami Aiyer (V.C. B.H.U.
(ii) Prof. F.W. Thomas Oxford University
(iii) Prof. Louis Renou Paris University
(iv) Prof. Velankar (Bombay University)
(v) Prof. K.R. Potdar (Bharatiya Vidya Bhavan, Bombay)
Out of these the first two will be examiners.

पोस्ट कार्ड

केवल पता

To

INDIA

नाम Prof. Charu Deva Shastri

पता 3, Cross Road, 1

डाकख़ाना Panjabi Mohalla,

ज़िला AMBALA CANTT.

(PANJAB)

22 X 18

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

59, De Hostel,
Hindu University
Banaras.
12.12.54.

मान्यास्तात चरणाः,

सप्रश्रयमभिवादये

ह्यः सायाह्ने श्रीमतां दलमवापि वृत्तं चाप्य-
वेदि। साम्प्रतं तु सुतरां स्वस्थोऽस्मि।
अहं तु प्रयस्यामि तमां मन्ये च कालेन
समुचितेन निबन्धो लेखिष्यत इति।
सङ्गृहीतेष्वपि तत्तद्ग्रन्थसन्दर्भेषु
कथं तद्विनियोग इति सुतराम पेक्ष्यते
बुद्धिव्यायामः। किञ्च विहाय पञ्च

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



दशान् ग्रन्थान् मेषा
माङ्गलभाषान्तराणि
नयने प्रथमवतरन्ति
अन्ये तु स्वयमेव
संस्कृतेनानुवदनीयाः
सन्ति। घृतादिकं श्री-
धर्मपालहस्तेन
सम्प्रेष्यत इति वर-
मेतत्। हंसराजकालेजे
तु नाद्यापि कश्चि-
न्नियुक्तो नित्यानन्द
पटेल धर्मसिंहोभाभ्या-
मपि तन्नियोगस्य प्रत्या-
ख्यातत्वात्। कुशल-
मन्यत्। विनीतः - सत्यव्रतः॥

पोस्ट कार्ड
जवाबी
केवल पता

पाम्बाला
14 DEC
8 AM
1954

DISTANCE
INDIA
13 DEC 54

नाम Prof. Charu Devagi Shastri,
पता 3 Cross Road,
Panjabi Mohalla,
डाकखाना AMBALA CAN II
ज़िला [PANJAB]

२३ ८ १४ ८

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

59, De Hostel,
B. H. U.
Banaras.
28.12.54.

मान्यास्तात चरणाः

सप्रश्रयमभिवादये

प्रद्यैव श्रीमतां दलमलम्भि स्वास्थ्य-
विकृतिप्रवृत्तिमुपलभ्य च महती
चिन्ताजनि। तत्प्रार्थये पत्रप्राप्ति-
समनन्तरमेव संसूच्यं कथं स्वास्थ्यं-
सम्प्रति वर्तते श्रीमतामिति।

शब्दापशब्दविवेकस्य शास्त्रि-
परीक्षायां पाठ्यत्वेन निर्धारणोदन्त
मधिगम्य परं प्राहृष्यच्चेतः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Qr. No 4,
Rajmahal,
Kurukshetra.
16.4.58.

मान्यास्तातचरणाः

सप्रश्रयं वन्दे।

अद्य षोडश्यां तारिकायां ट्रिब्यून पत्रे कुरुक्षेत्रेतिहासविषयको लेखः प्राकाश्यं गत इति विज्ञाय प्रमोमुदिष्यन्ति श्रीमन्तः। स्तम्भत्रयादपि किञ्चिदूर्ध्वपरिमाणं तस्येति भूयोऽपि सुखाकरिष्यति चेतः। श्री श्रद्धारामाट ट्रिब्यूनाङ्को गृहीतव्यो येनायतौ सत्यामपेक्षायां तदुपयोक्तुं शक्येत।

भवतां पौत्री साम्प्रतमपि जूर्णाचिन्तापरवशान् करोति नः। मन्ये ज्वरस्तस्याः कालेन कियताऽपि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

हसिष्यति। प्रद्युम्न-
कुमार नामधेय
ओल्ड सेक्रेटेरि-
यट टाइपकर्ता किम-
द्यापि सामग्रीसमेतो
नो गृहान्नोपेतः।
यद्येवम् स्मारयि-
ष्यामि तम्।
कुशलमितरत्
पूज्येभ्यो मातृ-
चरणेभ्यो विलस-
न्तु तमां मदीयाश्च
उषसश्च प्रणा-
माञ्जलयः।

वशंवदः
सत्यव्रतः

पोस्ट कार्ड
साधारण कार्ड प्रेषण के लिए
केवल पता

To

Prof Charu Deva Shastri,
23-F, Kamala Nagar
Delhi-6

DELHI-6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

हसिष्यति। प्रद्युम्न-
कुमार नामधेय
ओल्ड सेक्रेटेरि-
यट टाइपकर्ता किम-
द्यापि सामग्रीसमेतो
नो गृहान्नोपेतः।
यद्येवम् स्मारयि-
ष्यामि तम्।
कुशलमितरत्
पूज्येभ्यो मातृ-
चरणेभ्यो विलस-
न्नुत्तमां मदीयाश्च
उषसश्च प्रणा-
माञ्जलयः।

वशंवदः
सत्यव्रतः

पोस्ट कार्ड
साधारण कार्ड प्रभाव के लिए
केवल पता



To

Prof Charu Deva Shastri,
23-F, Kamala Nagar
Delhi-6

DELHI-6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



पोस्ट कार्ड

साथ का कार्ड जवाब के लिए

केवल पता

INDIA

सेवा में -

नाम श्री प्रो. चारुदेव जी शास्त्री

पता C/o सत्यव्रत जी शास्त्री

224 कमलानगर

सब्जीमंडी

डाकख़ाना दिल्ली

ज़िला Delhi

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
६।११।५४

प्रिय सत्य, आयुष्मानेधि। विद्युतापि ते सन्देश-
महारयं रेलयानेनापि। उभयमलब्धा इति प्रत्येमि।
यथाऽत्र प्रवर्तितव्यं तथा निर्दिश्यते। एष क्रमः।
त्वया प्रार्थनापत्रं लेख्यं तच्च डाक्टरमहाभागैः
साधु समर्थनीयमुपकुलपतिना च तत्रैवोमिति न्यस-
-नीयम्। एवं कृते सर्वमिष्टं सेत्स्यति, अनाश-
ङ्क्यं च भविष्यति। सिद्धेऽस्मिन्नर्थे डा० जी० एल-
दत्तमहोदयास्त्वरितमावेद्याः। यद्यपेक्षिताऽनुमति-
र्दुर्लभा स्यात्तर्हि स्वे कर्मणि सर्वं विहाय व्यासङ्ग-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

मनारतं प्रवर्तनीयम् । इदमर्थान्तरं स्मार्यसे । श्री मोतीलाल-बनारसीदासेभ्यः सार्धाः सप्तपञ्चाशद् मुद्रादयः । डाक्टरेऽयस्ते द्रव्यराशिरवतिष्ठते स तेनैव वाराणसेयेऽवतिष्ठतां यावन्निश्चितम् । अन्यत् सर्वं सुखम् मातस्ते सन्त्वाशिषोभूरय इति वेदनेन विरमाम्यहं वत्सलस्ते जनन्यश्चारुदेवशास्त्री ॥

पोस्ट कार्ड
साथ का कार्ड जवाब के लिए
केवल पता

9 PS INDIA 9 पा

नाम श्री सत्यव्रत शास्त्री
पता पूर्ट, डे होस्टल
बनारस हिन्दू यूनिवर्सिटी
डाकख़ाना बनारस
ज़िला (यू० पी०)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

साथ का [illegible] के लिए

केवल पैसा

नाम श्री सत्यव्रत शास्त्री

पता रूम नं, डे होस्टल

बनारस हिन्दू यूनिवर्सिटी

डाकखाना बनारस

ज़िला (यू० पी०)

CC-0. Prof. Satya Vrat Shastri Collection.

अम्बालयतः
६।११।५४

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्य, आयुष्मानेधि। विद्युतापि ते सन्देश-
महारयं रेलयानेनापि। उभयमलब्धा इति प्रत्येमि।
यथाऽत्र प्रवर्तितव्यं तथा निर्दिश्यते। एष क्रमः।
त्वया प्रार्थनापत्रं लेख्यं तच्च डाक्टरमहाभागैः
साधु समर्थनीयमुपकुलपतिना च तत्रैवोमिति न्यस
-नीयम्। एवं कृते सर्वमिष्टं सेत्स्यति, अनाश-
ङ्क्यं च भविष्यति। सिद्धेऽस्मिन्नर्थे डा० जी० एल
दत्त महोदयास्त्वरितमावेद्याः। यद्यपेक्षिताऽनुमति-
र्दुर्लभा स्यात्तर्हि स्वे कर्मणि सर्वं विहाय व्यासङ्ग-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
१२।८।५८

प्रिय पुत्रक, आयुष्मानेधि। इदानीमेव पत्रं ते
ऽविदमवेदिषं च वृत्तम्। यदि गमागमयो र्व्ययो ऽस्माभिरेव
सोढव्यस्तर्हि नार्थः शर्म्मण्यदेशे धीत्यर्थया गत्या।
गोतीर्थमेवाक्रायणीयम्। पञ्च सहस्री मुद्रास्ते हस्त
एवास्मदीयाः, यन्मे यद्वा ते न्यायास्तत्तवैवेति विद्धि।
त्वरितं गोतीर्थविश्वविद्यालयाधिकृतेभ्यः पत्रं प्रेर्यं
नेत्ते विस्मरेयुः स्वं वचः समुदितम्, अपि वा प्रती-
क्षां ते परिहरेयुः। अद्य प्रभृति विदेशयात्रानुज्ञायाः
कृते यत्कार्यजातं करणीयं तत्प्रारम्भणीयम्। शङ्के
ऽल्पीयान्समयोपशिष्टः। बहु च साध्यम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

इत्युदाहृत्य विरमति वत्सलस्ते तात-
श्चारुदेवश्शास्त्री॥

देहलीत:
५।६।५६

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्य ज्योग्जीव्यां नित्यं चाभ्युदियाः। ह्यस्ते लेखमध्यगच्छं वृत्तं चावागच्छम्। यत्संस्कृतज्ञैः संस्कृतं प्रचिस्चारयिषुभिरागन्तूनां कृते साधीयसी संविधानाकारि तत्तेषां स्वालक्षण्यमिति मर्षणीयम्। अस्तु। इदं नो वृत्तम् — अम्बायास्तेऽज्वरो द्यापि नापागात्। अस्त्यस्यावशेषः कियानपि। ज्वरजन्येन श्लथत्वेनायं कुतोऽनुपरम इति केचित्। तथा वास्त्वन्यथा वा। वयं तु तस्य कृते संज्वरामः। अम्बा च ते मनःस्वास्थ्यं नाश्नुते शरीरपोषं च नाप्नोति। अद्य दशाहस्तस्या ज्वरेण गृहीतायाः।

CC-0. Prof. Satya Vrat Shastri Collection.

इत्युदाहृत्य विरमति वत्सलस्तेतात
स्वारुदेवरशास्त्री॥

देहलीत:
५।६।५६

प्रियसत्य ज्योग्जीव्यां नित्यं चाभ्युदियाः। ह्यस्ते लेखमध्यगच्छं वृत्तं चावागच्छम्। यत्संस्कृतज्ञैः संस्कृतं प्रचिस्वारयिषुभिरागन्तूनां कृते साधीयसी संविधानाकारि तत्तेषां स्वालक्षण्यमिति मर्षणीयम्। अस्तु। इदं नो वृत्तम् — अम्बायास्तेज्वरो ह्यापि नापागात्। अस्त्यस्यावशेषः कियानपि। ज्वरजन्येन श्लथत्वेनायं कुतोऽनुपरम इति केचित्। तथा वास्त्वन्यथा वा। वयं तु तस्य कृते संज्वरामः। अम्बा च ते मनःस्वास्थ्यं नाश्नुते शरीरपोषं च नाप्नोति। अद्य दशाहस्तस्या ज्वरेण गृहीतायाः।

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

मुम्बय्यां स्थिरं नावस्थेयम् । वृत्ते
ऽपेक्षिततमे कार्यजाते परावर्तनी
यम् । अम्बाया विषये नातीव
मनो व्यथनीयम् । भगवदनुग्रहेण
नचिरात्कल्पतामकलयिष्यते
सेति बलवदाशासे । अन्यत्सर्वं
सुस्थम् । इह तु निदाघः परमं नाण्डि
मानं धत्ते, दिधक्षन्निव गात्राणि रजो
-विक्षिपो वाति वातः । दुःखं विवर्द्धति
लोकयाना । अम्बायास्ते सन्नाशिषो मम

पोस्ट कार्ड

साथ का कार्ड जवाब के लिए

केवल पता

POSTAGE

9 पा

नाम श्री डा० सत्यव्रत शास्त्री
एम्.ए. पी.एच्.डी.

पता c/o
श्री ऋषि मित्र जी
आर्य समाज, काकड़वाड़ी

डाकख़ाना विट्ठलभाई पटेल रोड

ज़िला (गिरगाँव) मुम्बई
Bombay.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

4, Rajmahal,
Kurukṣetra.
(Karnal)
1. 4. 58.

My dear Father,
I reached this place quite hale and hearty on Monday morning. Due to heavy work I could not write to you earlier. I hope the old Secretariat typist has taken Padanañjari from you. He must also have shown you the specimen. I have received Rs. 50/- as T.A. from Patiala. How does Munni feel now? Respects to dear mother.

Yours affectionately
Satya Vrat

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

जवाबी

केवल पता

Prof. Charu Deva Shastri,

23-F, Kamala Nagar

Delhi—6

DELHI—6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

जालन्धरतः
पौषस्य द्वितीयस्मि
न्नहि ।

प्रियसत्य, ज्योग्जीव्या नित्यं वीन्युदियाः । पत्रं
द्वैतीयकमप्यधिगमम् । श्रीरेणुमहाशयैस्त्वदीयः प्र-
बन्धो बहुतरकं प्रशस्तः सत्तम इति च निर्दिष्ट इति गुरु-
र्नः प्रहर्षो नात्मनि प्रभवति । श्वभूते वाराणस्यामुपाधिस्ते
वितरीष्यत इति भूयो नन्दति चेतः । अहं देहलीतो द्यो नक्त-
मिहागाम् अद्य नक्तं च वरालामासादयिष्यामि । तत्रा पञ्च
विंशादह्नः स्थातास्मि । एतावन्तं कालमभ्यातवैकलेति
न रंस्यते विविक्तस्यानुचिता । वाराणस्यां चिरतरेणा-
वस्थानेन च नार्थ इति नचिरात्ततस्ते प्रस्थानं युक्तं
पश्यामि । अहं वरालात आवृत्य गेहं गन्तास्मि, तत्र

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम

पता

डाकख़ाना

ज़िला

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
२९।७।५५

प्रिय सत्यायुष्मानेधि। इदानीमेवाह महियापुरात्प्रत्यावृत्तः। अन्वेषमन्वेषमपि मुकुन्दझा कृतिर्निरुक्तविवृतिस्तत्र नापि, शारदारञ्जनकृता शाकुन्तलटीकापि नासादिता, अपरेण बाङ्गेन कृतं त्वया चोपयुक्तचरं शाकुन्तलव्याख्यानं तु बाढमाप्तम्। मया तु शारदारञ्जनकृतं शाकुन्तलविवरणं न जात्वक्रायि, त्वया क्रीयेत नाम। वाराणस्यां शारदारञ्जनकृतविवरणोपेतं किमपि पुस्तकं त्वया क्रीतमिति स्मरामि, तत्किमिति तु न स्मरामि। श्रीमुकुन्दझामहाशयैर्विवृतं निरुक्तं त्वस्मदीये पुस्तकसङ्ग्रहेरन्तरवर्ततेति दृढं जाने, त्वत्क्व गतं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

INDIA

नाम Prof. Satya Vrat Shastri
M.A., M.O.L.

पता Hans Raj College

डाकखाना

ज़िला Delhi

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

प्रम्बालयत:
१३।८।२२

प्रिय सत्य! आयुष्मानेधि। यत एत: प्रातः- प्रस्थायि रेल-यानमद्यतत्सरसादायात्यतो याचिकभूयिष्ठं भवतीति नेद-मस्मदनुगुणम्। अस्माभिर्हि प्रभूतमुपकरणजातं बोद्धव्यं जनावीजे च याने तद् दुर्वहं भवति कदर्थनां यानल्पां कल्पयति। मध्याह्ने द्वादशवादनवेलायां त्वित एव सज्जी-भूय प्रतिष्ठेमहि यानमिति तेन नो यात्रा सुखाय भविष्य-तीति पूर्वे व्यवसाय परिवर्तः। इदं च यानं सायाह्ने षण्णादमितायां वेलायां देहलीमासादयतीति रविवारे प्रस्थानं नावश्यकमित्यष्टादशे दिवसे बृहस्पतौ प्रस्था-स्यामइ इति विदाङ्कुरु। इह विलम्बेनन नार्थ इति

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

त्वरितं प्रस्थानमिच्छामः।
रेलयानविरामस्थाने च ते सन्निधि
र्नितरामिष्यत इति वचनं नापेक्ष्यते।
यदि चास्य वाचिकस्योत्तरं षोडशे
दिवसे प्रेरयेस्तदा नो विस्रम्भाय
कामिताय स्यात्। मातुस्ते सन्ध्या-
शिषो भूरय इति शं सन्विरमति वसल-
स्ते तातश्चाहदेवश्शास्त्री॥

पोस्ट कार्ड
साथ-का कार्ड जवाब के लिए
केवल पता
DELHI G.P.O

नाम Prof. Satya Vrat Shastri M.A., M.O.L.

पता Hans Raj College, Delhi.

डाकख़ाना

ज़िला

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
९. ३. ५५

प्रिय सत्यायुष्मानेधि।

कारिकाया विवरणं त्वत्प्रेरितं प्रापम्। अद्य वर्तमानकालस्य सत्त्वमधिकृत्य निबन्धुमारब्धोस्मि। इदं च ते प्रसत्तये भविष्यति सुष्ठुतरां प्रक्रमो जनीति, अयं च निबन्धोष्टपार्श्वात्मको भविष्यतीति प्रत्येमि। पुस्तकान्तरोद्धृतेन लेखेन समन्वितस्तु षोडश पत्र पार्श्वानि व्याप्स्यति। सर्वथा स्वदिष्य ते ते, विशेषज्ञाय चापरस्मा इत्यपि साध्ववैमि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

जवाबी

केवल पता

नाम श्री सत्यव्रत शास्त्री

पता 58, डी होस्टल

बनारस हिन्दू यूनिवर्सिटी

डाकख़ाना बनारस

ज़िला

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
२९।१२।५४

प्रिय सत्यायुष्मानेधि ।

प्राप्तं ते पत्रम् । तत्प्राप्तेः पूर्वमेव प्रेरितं मया पत्रं प्राप्तचरस्योत्तरभूतम् । यदध्यवसीयते दिक्कालावेवाधिकृत्य निबन्धः प्रणेय इति तदेव साधु यदि तावतेष्टप्रकृतिं पश्यन्ति डाक्टर महाभागाः । मा भूद वृथा कलेवरवृद्धिः, इष्यते तु कियदपि निबन्धकलेवरम् । तत्र ते प्रमाणमिति नात्र मामकं वचः प्रसरति । तस्य तस्योद्धृतस्य सन्दर्भस्य स्वेन निबद्धस्य हरिग्रन्थाशयस्योपन्यासश्च यदि डाक्टरमहोदयैर्निरीक्ष्येत शोध्येत च तर्हि किमपि गुणान्तराधानं स्यात्ते हितम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरत:
१०।२।५९

प्रिय सत्य ज्योग्जीव्या नित्यं चाभ्युदिया:।

अद्य मध्याह्ने पत्रं ते धिगत्य किमपि दुर्मना अभूवम्। मन्ये चौधुरीमहाभागा यत्पुराऽश्रौषुस्तत्सम्प्रति प्रतिसंजिहीर्षन्ति। व्यक्तं स्मराम्युदितं तैः सायन्तने कालेजे प्रवर्त्स्यति नियतं ते नियोगो भावीति। परं संचारिण्यश्चित्तवृत्तय इति किमत्र वक्तव्यम्। अस्तु, कार्योत्र यत्नः। पञ्चनदीयां शास्त्रिपरीक्षामुत्तितीर्षुणाऽवश्यं विशारदपरीक्षोत्तीर्णेन भाव्यमित्येष नियामो नाभिव्याप्नोति संस्कृते एम्.ए. परीक्षिमुत्तीर्णान् इति मे मनीषा। तथाप्यत्र विषये नियमपुस्तकमवलोकनीयं निर्णेयश्च सन्देहास्पदं विषयः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
२९।१२।५४

प्रिय सत्यायुष्मानेधि ।

प्राप्तं ते पत्रम् । तत्प्राप्तेः पूर्वमेव प्रेरितं मया पत्रं प्राप्तचरस्योत्तरभूतम् । यदध्यवसीयते दिक्कालावेवाधिकृत्य निबन्धः प्रणेय इति तदेव साधु यदि तावतेष्टप्रकृतिं पश्यन्ति डाक्टर महाभागाः । मा भूद वृथा कलेवरवृद्धिः, इष्यते तु कियदपि निबन्धकलेवरम् । तत्र ते प्रमाणमिति नात्र मामकं वचः प्रसरति । तस्य तस्योद्धृतस्य सन्दर्भस्य स्वेन निबद्धस्य हरिग्रन्थाशयस्योपन्यासश्च यदि डाक्टर महोदयैर्निरीक्ष्येत शोध्येत च तर्हि किमपि गुणान्तराधानं स्यात्ते हितम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

केवल पता

INDIA

Dr. Satya Vrat Shastri,
M.A., Ph.D.
4, Rajmahal,
Kurukshetra P.O.
(Dist. Karnal)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

वाराणसीतः
११।३।६१

प्रिय सत्यायुष्मानेधि,

पत्रं तेधिगतमवगतं च वृत्तम्।
प्रत्याददीरन्नधिकृताश्चण्डीगृहेऽस्मदीयं वास्त्विति स्थितो
निश्चयः। केवलं यथा तेऽचिरं प्रत्यर्पयेयुर्नो देयं मूल्यांशं तथा
श्रीपरमेश्वरीलालवर्म्मभिः प्रेर्याः। नान्यदतोस्ति कृत्यम्। अद्येतः
श्रीशान्तिलाल आर्हतो देहलीं प्रस्थितस्तस्मिन्गृहकुञ्चिका
न्यासीति ततो ग्राह्या। नात्र कालसङ्गः कार्यः। सरस्वती-
भवने मेरुतुङ्गकृतिर्मेघदूतमस्ति न वेति प्रक्ष्याम्यकालहीनम्।
नियमावलिं चाप्यादाय स्वाग्विस्रष्टास्मि। अपरमपि सहस्रं
मुद्राणां त्वया पितृव्येर्पितमिति प्रियं मे। अप्रेलमासारम्भे चा-
प्यन्यत्सहस्रं दित्ससीति सदृशं ते। एवमचिरेणैव ऋण-

CC-0. Prof. Satya Vrat Shastri Collection.

विमोक्षस्ते संवत्स्यतीति चिन्तयन्ने
परं निर्वृणोमि । सहापत्यस्य सहजाने
स्ते सुखं यान्तु वासराणीति नित्यमा
शासे । त्वदम्बा च ते शान्तातिमिच्छति
सततम् । आयुष्मन्तौ शिशू इन्दुशर-
च्चन्द्रौ वस्मद्वचसा लालनीयावि-
त्युदीर्य विरमति वत्सलस्ते तातश्
चारुदेवश्शास्त्री ॥

POST CARD
REPLY.
ADDRESS ONLY
INDIA POSTAGE

Dr. Satya Vrat Shastri,
Ph.D.
3/54, Roop Nagar,
Delhi — 6

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD

REPLY

ADDRESS ONLY

9 PS 9 PS

INDIA POSTAGE

13.3.61

Dr. Satya Vrat Shastri,
M.A., Ph.D.
3/54, Roop Nagar,
Delhi—6

CC-0. Prof. Satya Vrat Shastri Collection.

काशनं संविधीयताम् । यावदेव स निबन्धो मां प्राप्नोति तावदेव तमितः प्रेरयिता स्मीति ॥

अम्बालयतः
१।३।५४.

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्यायुष्मानधि ।

अद्यैव प्राह्णे गुरुप्रियैर्गुरुमुखेरितैर्वाऽक्षरैर्लिपीकृतार्थं ते लेखमापं परं च प्रासदम् । एवमल्पीयसाऽनेहसा गुरुलिपिमभ्यास्थ इति यत्सत्यं प्रातिहार्यमिव संवृत्तम् । तल्लिपेरध्ययनेपि ते त्वरिततरा गतिरभूदित्यपि प्रियं मे । आचार्यविश्वबन्धुशास्त्रिणस्त्वदीये निबन्धे बहुप्रशस्यं पश्यन्ति प्राथमिक इति चाभिनन्दन्तोपि तत्र क्वचित्क्वचित्परिमार्ग्यं मन्यन्ते । अद्याहं तानुद्दिश्य पत्रं लेखिष्यामि प्रक्ष्यामि च यदि नाम वाराणस्यां वर्तमान एव त्वं तत्परिमार्जनं कर्तुं पारयेः । अहं तु शङ्के नेदं संभविष्यति । न ह्याचार्यास्तथा सक्षणा यथा तत्र तत्र स्थलेषु वितत्य निर्देशयुरिद-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

श्री सत्य व्रत शास्त्री

४२३, बिरला होस्टल,

हिन्दू यूनिवर्सिटी

वाराणसी पि०

(यू० पी०)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

श्री सत्य व्रत शास्त्री

९२२, बिरला होस्टल,

हिन्दू यूनिवर्सिटी

बनारस पि०

(यू० पी०)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

२३ एफ कमलानगरा
द्देहलीस्थात्
९।१२।५६

प्रिय सत्य, आयुष्मानेधि।

अद्य प्रगे लक्ष्मणपुरतस्ते श्वश्रूः सहसुता सनप्तृका चेह प्राप्ता। उषाश्च सुतामसोष्ट। यथा तेन्वाऽन्वमिमीत तथैव परिणतम्। अद्य प्राह्णे मामप्राक्षीत्सम्प्रति कतरः पक्षो ज्यौत्स्नो बहलो वेति। मया प्रत्यवाचि बहल इति। सपदि साऽभणीत् बहले तु कन्यका जायन्ते। मह्यं तु नेदमरोचिष्ट, जोषं चास्याम्। परं विरलमेव तस्या व्याहृतयो विप्लुतार्था भवन्तीति त्वयाप्यसकृदनुभूतम्। अस्ति तस्यां किमपि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



Dr. Satya Vrat Shastri
Senior Lecturer,
Kurukshetra University,
Kurukshetra P.O.
(Dist Karnal)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

वाराणसीत:
१।४।६१

प्रिय सत्यायुष्मानेधि ।

अद्य चिरं पत्रं तेधिगतवतो मे । किंकृत-
मिदं नैभृत्यमिति चिन्तयानावावां नितरां निर्निर्वृती स्वः । अहरहर्
हीयेह मङ्गैः परश्च त्वदम्बायाश्शरीरसाद इतीहैव प्रायणं
माभूदित्यध्यवसितमितोऽविलम्बितं प्रयाणम् । तेन मईमास-
स्य प्रथमेहनीतः प्रतिष्ठासावहे, द्वितीयेहनि च देहलीमासाद-
यितास्वहे । तस्मादौपरिष्टमागारमधिवसञ्छ्रीगुप्तः साम्ना
वाच्योन्यत्र स्वो वासः प्रकल्प्यतामिति । मन्ये मासाभ्यन्तरे
शक्ष्यत्यसावगारान्तरमवक्रेतुम् । यदि देहल्यां स्थितिर्नौ
सुखा ससमादरा च भविष्यति तर्हि तत्रैव गेहेऽवस्थास्यावहे,
नो चेदहियापुरमुपगम्य तत्रैवायुःशेषं क्षपयिष्यावः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD

जवाबी
REPLY

केवल पता
ADDRESS ONLY

POSTAGE

INDIA

Dr. Satya Vrat Shastri,
M.A., Ph.D.

3/54, Roop Nagar,

Delhi—6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
२०।६।५८

प्रिय सत्यायुष्मानेधि। अद्य मध्याह्ने लेखं ते विदं वृत्तं चावेदिषम्। त्वमपि सर्वाह्नं तीव्रया वियोगवेदनया कदर्थितोऽवशमरोदीरिति कलयाऽपकृष्टोपि मे शोकः प्रकर्षं गतः। ममैवेयमधन्यता यदयमुपनतो वियोगः। ह्रीनिषेवस्य सहजसौशील्यस्य ते को नामापराधः। विदिता मे ते मातापितृभक्तिः। परा हि नौ त्वयि स्नेहप्रवृत्तिः। इयमेव मां विह्वलयति। अम्बां च ते पर्याकुलयति। अस्तु। इदमेवाभ्यर्थये भगवन्तं प्रकृतो विरहो मास्म चिरतरं स्यात्। कञ्चित्कालमिह स्थितिर्नावुभावपि मात्रयोपकुर्यादिति काचिदाशंसा मे मनसि किंचिद्धैर्यमादधाति। यदि नाम मे तनोस्तानवं

CC-0. Prof. Satya Vrat Shastri Collection.

किं ञ्चिदपेया-मातुश्च ते दक्षिणाक्ष्णो
दर्शनं प्रकुर्वीत शिशिरोदकोपचारेण
तर्हि चरितार्थता स्यादिहावस्थितेर्नः।
इह नात्यन्तिकी समवस्थितिर्नो व्यव-
सिता। प्रियोषसि त्वया भूयो वधात-
व्यम्। वनपुष्पादिक्वाथसंसेवनेन
कासो ज्वरश्चापि शमं यास्यतः।
पौत्रीनोऽस्मद्वचसा मुहुर्मुहुर्लाल-
नीया। उषसि त्वयि च सन्तु न आशि-
षो भूरय इत्युदीर्य विरमति वत्सलस्ते ताप-
श्चारुदेवश्शास्त्री॥

पोस्टकार्ड
21.6.58
केवल 5 DAM

Dr. Satya Vrat Shastri
M.A., Ph.D.
23 J, Kamala Nagar,
Delhi-6

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Dr. Satya Vrat,
Vyakaranacharya (Banaras)
Shastri, M. A, M. O. L (Pb.)
Ph. D. (Banaras)
Lecturer in Sanskrit,
Hans Raj College and
Department of Post-Graduate Studies,
Delhi University

Digitized by Sarayu Trust Foundation and eGangotri

दहलीत:
२.१२.'५६.

मान्यास्तातचरणाः, सप्रश्रयं प्रणामाः

ऽअथ चिरायोदीक्षितं मनत्पश्युपलभ्य परं प्रासदन्मे मनः। ऽआचार्या इत्थलिखितानां ग्रन्थानां सूचिमभिलषन्ति तत्तद्ग्रन्थावाहय इति साऽनेन पत्रेण सत्वैव चेदयते। प्रारम्भता मञ्जसैव ग्रन्थागाराधिकृतैः पत्रव्यवहारो येनानतिबहुना कालेन तेषामुपलम्भः स्यात्।

ऽअथ तं शङ्कमधिकृत्य विदमेव विवक्षामि सर्वथा न स स्वां प्रकृतिं जहाति। सत्यवसरे दृशत्येव। दंशो हि नाम तस्य स्वो भावः। यद्यपि नाहमौदासीन्यमवलम्बे समुचितं वा प्रतिवचनं न ददे तत्पौरोभाग्यं वा न प्रतिविदधे तथापि सर्वकालं मरुन्तदैर्वाग्बाणैरनुविताभिश्च चेष्टाभिः सम्भवत्येव मानसी रुजा। ऽप्रस्नस्वे पुनर्मनसि कुतः शान्तिः कुतो वा समाधिः? एवं सत्यपि प्रतिदिनं व्यायामशीलोऽस्मि, श्लोकनिर्माणपरश्च, न रोचमाविष्करोक्ति मर्मस्वभिहतोऽपि जन्। इदमेवाशास्ते सर्वथा भूतभावनः शङ्करः शङ्करिष्यतीति। कालः कश्चेतप्रतीक्ष्यः।

ऽआम्नातवतो न कापि प्रवृत्तिरुपलक्षयितव्यचरणानां तत्प्रणयिनेन हेतुतामियुयात्। मातरादयः जनस्तत्र सम्बन्धे गताशा इताशा वा संवृत्ताः। किं शोभनेयमस्मत्प्रचोदनेति च मुहुर्मुहुरामनन्ति। ऽइदन्तु मन्ये कालं प्रतीक्ष्यमेव प्रतीक्षते। ऽअथान्तरेऽयं वटुरनो वा सज्जनैर्मैत्रेण पत्रं प्रेरयिष्यते, तदविलम्बितमुत्तरम्। सोऽयं महाभागः तत्रैव शोभने

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अरोड़ाजातीयोऽत्र नवद्विसङ्गतचर इति।

कुन्दमालां नाम नाटकं परिष्कुर्वद्भिस्तत्र भवद्भिर्निभृतशब्दार्थस्य विकासमधिकृत्य वाचाऽऽङ्गल्या यदवाचि तत्प्रतिलिपीकृत्य सत्वरमेव मे प्रेर्यम्।

कुशलमितरत्। रीडरपदे किमेको नियोक्ष्यते द्वौ वेति जिज्ञास्यं तदवस्थमेव। आर्चायाः कथमत्र पश्यन्ति।

वशंवदः —
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

साध्वाश्रमतः
१३।११।५६

प्रिय सत्यायुष्मानेधि ।

परह्योहं द्वे अपि ते कृती बहत्तरं भारतं जातककथासङ्ग्रहं च श्रीविश्वबन्धावार्पयम् । अवोचच्च स महाभागः कतिभिश्चिदहोभिरेतयोरध्ययनं पारयितास्मि दर्शनं च स्वं वक्तास्मीति । वाक्यपदीयसंस्करणमधिकृत्य नाहं तमप्राक्षम् । अद्य प्रक्ष्यामि । लूधियानातो भूयोपि लेखोऽधिगतः । कियदस्य धन्यस्य भिषग्वरस्यौन्मनस्यमस्माभिः सममात्मानमभिसम्बन्द्धुमिति तल्लेखतः शक्यममुक्तसंशयं विज्ञातुम् । अत्र कर्मणि स कालसङ्गस्यासह इत्यपि न तिरोहितम् । रविवासरे नवाम्बरमासस्याष्टादशे दिवसे भवन्तमुपद्रष्टास्मीति पत्रेणावेदितोऽसौ । इदमत्र विमृश्यं यदि सर्वं वृत्तजातं परीक्ष्य परितुष्यामि दोषं वा वैकल्यं वा न किमपि विभावयामि तदा मयोमिति वाच्यमुत नेति । यदि परिप्रश्नाख्यानाभ्यां निःशेषिते जिज्ञास्ये तूष्णीकामासे तदा महते तस्य मनोभङ्गाय भविष्यति मे संनिकर्षः । अहन्त्ववैमि महत्तरेण कुलेन नः सम्बन्धो नो निकर्षं सततं स्मारयिष्यति वधूपक्ष्याणां चोत्कर्षम् । नैतदेव । इदमितरेतर वैषम्यं शमं दूषयेदान्तरागारिकं कलहं च प्रसञ्जयेदित्यपि च शक्यशङ्कम् । होश्यारपुरे नियुक्तौ तु ते सहायभावं गमिष्यन्तीत्या-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

शंसया स्वेनैव हस्तेनाङ्गारा नाकर्षणीयाः। उच्चैस्त्वलोभेनोप
हता भविष्यन्तमनर्थं न पश्येमेति विसदृशं नः। यथा चोपवर्णिताः
कन्यकायास्तस्या गुणाः प्रियेण धर्मपालेन तथौपयिकमेवेक्षे नो
ऽभिसम्बन्धपरिग्रहम्। अत्र यथा त्वं पश्यसि यथा वा तेऽ
म्बा मन्यते तथा त्वरितं पत्रमारोप्य विशदं दर्शनमहमावेद्यः,
शनिवासरे चेहोत्तरं ते यथा लभेय तथा त्वरणीयम्। भिषग्वरस्य
निभृतोपन्यासं तं लेखमिहावेष्ट्य प्रेरयामि येन त्वमात्मना विद्याः
कियत्यस्य स्पृहाऽस्मदभिसम्बन्ध इति। ज्येष्ठा ह्येषाऽस्य
दुहितेति विवाहविधिरूर्जितो भविष्यतीत्यलं संभावये। प्रथमश्चायं
परिणयः, अपरिणीतत्वादितरासां कन्यकानामकृतदारत्वाच्चैतरेषां
कुमाराणाम्, ऋद्धिमांश्चायमिति सर्वं शुभं भविष्यतीति मन्ये।
आशासे त्वं सर्वथा कुशली पोषं च शारीरं नित्यं कल्पयसीति
पर्यवसितवक्तव्यो विरमति वत्सलस्ते तातश्चारुदेवश्शास्त्री॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

साध्वाश्रमतः
२३।११।२६

प्रिय सत्यायुष्मानेधि।

परह्योपि पत्रं ते प्रैरिरम्।

बृहत्तरं भारतं जातककथासङ्ग्रह इति संज्ञे द्वे अपि ते कृती अभिनन्दिते दोषज्ञैराचार्यविश्वबन्धुभिः प्रकाश्ये इति चाभ्युपगते। परं क्वचित्क्वचित्केचिद्दोषलेशा निरदिक्षन्त। प्रथमायां कृतौ प्रथमे पत्रे द्वित्रेषु स्थलेषु प्रमादजमक्षराधिक्यमक्षरन्यूनत्वं चास्ताम्। ते अपाकृते। यद्यपि श्लोके षष्ठं गुरु ज्ञेयमिति पिङ्गलेन नादृतं तथापि प्राय एवं भवतीति नियमेन षष्ठमक्षरं गुरुकमिच्छन्त्याचार्याः साभिनिवेशाः। तदनुरोधान्मया तथा कृतमितीममपि परिवर्तं रोचयिष्यति वत्सः। भुजङ्गप्रयातेषु ततस्तत्र कालात्परावृत्तिशीलात् इत्यत्र परावृत्तिरिति पदं परिवृत्त्या समानार्थकं नेत्युपेत्य परीवर्त इति पदं तत्र न्यधायि। अन्यत्रापि क्वचिच्छङ्कतेऽसौ। परमस्थाने तच्छङ्कितमिति नाहं तन्तम्प्रयोगमन्यथयितुमुत्सहे। इदं चापरमवधेयम्

— स सूक्ष्मदृग् हिन्द्याऽऽङ्गल्या वाऽसहचरितमेव काव्यद्वयं प्रचिकाशयिषति न तु तयोभय्योपेतम्।

जातककथासङ्ग्रहेपि प्रथमे पत्रे अदभ्रमभ्रंलिहमास्ते— त्येतस्मिन्पद्येऽभ्रंलिहमिति वैभवस्य विशेषणं दत्तम्, इत्यत्रेव गृहस्येति दोषमुदाहरति सः। त्वमप्येवमन्वभूः, अहं चापि, परं प्रवाहं शब्दसौष्ठवं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

चादृत्य परिवृत्तिं चाकामयावहि। षष्ठे श्लोके तृतीये चरणे युवा कुमारः प्रति बुद्धतत्त्व इत्यत्र युवकुमारयोः समं निर्देशे को भिप्रायो वत्सस्य?

अस्तु। यत्र यत्र परिष्कार इष्यते स करिष्यते परं यदि स सर्वथोपपत्तिमत्सु व्यवहारानुगतेष्वपि प्रयोगेष्वज्ञानवशादसाधुत्वमुत्प्रेक्षते परिवृत्तौ चाभिनिविशते तदा कृती इमे नेह प्राकाश्यं यास्यतः। एवं सति स्वेनैव मूल्येन प्रकाशयिष्याम इति व्यवसितम्। इहावरणेऽन्तः कृतं 'बृहत्तरं भारतम्' इत्यस्य प्रथमं पत्रं साध्वालोच्य मत्कृतांश्च परिष्कारान्समीक्ष्य सत्वरं परावर्तनीयम्।

सत्यवसरेऽवशिष्टाः पञ्चाशच्छ्लोका अपि प्रणेया येनेयं कृतिः कृत्स्ना स्यात्।

अम्बा तेऽद्यत्वे किमवस्थेति मे चेतः स्वास्थ्याय त्वरितं निवेदय। सर्वथा मान्यां तां मातरं मानय प्रणतश्चाराधयेति पर्यवसितवचा विरमति वत्सलस्ते

तातश्चारुदेवश्शास्त्री॥

लुटि 'उपैतास्मि' इति वृद्धौ सत्यां रूपम्।

षड्विंशतितमी तारिकेति पूरणप्रत्यये रूपम्।

षड्विंशीति वा। न तु षड्विंशतितारिकेति। इत्यत्रावधेयं वत्सेन।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

वाराणसीतः
१।४।८१

प्रिय पुत्र्युषः,

ग्रथ चिरं ते लब्धं प्रातर्चेतो मे। ग्रथ
~~ग्रथ~~ यानि निदानानि वर्णसम्मृतिकण्डूयादिभीरुभिः परं महं काश्मैं वैक्लव्यं चानेनानि। ग्रसकृदहमचिन्तयं पत्रं ते लिखेयमिति, परमस्वस्थचेतसि निश्चयश्च क्लेचरे नाचन्दलं किमपि लेखितुम्। जानीवेतरां जराधरीताङ्गयो नैव व्याधुपस्टब्धयोरावयोर्दूरेऽवस्थानं क्षिमन्तो दुःखाकरोतीति न शपयितव्यासि। तत्राप्यसति सर्वसुखोपकरणसमृद्धे स्वे सद्मनि। इदं च ते न न्याय्यतमं मातुस्तेऽर्थसाहाय्यकमन्तरा न शक्तिमासीन्निचेतनमिदं ग्रन्येणाप्यिचर्तुम्। तदयाचामत्कुताकुतं हेम तत्र व्यालेऽल्पार्घमिति सूचयं बहुपरिक्रामं तस्यै प्रीतिदाय इति दत्तं तच्चेत्सा नार्घयेदस्मासु निश्चब्धं, न व्ययः श्राव्यक्रियः स्यात्। एवं सर्वमात्मीयं समर्पयित्वा यदि सा परवशान्नतु स्वचशाद्दूरतरे प्रदेशे वासमङ्गीचरोति, तत्रापि तस्या मर्मणि न स्पृशेत्तदाऽऽश्चर्यमिव स्यात्। तेनैतावानेहा तया स्वं पारवश्यं चिन्तयन्त्याऽऽत्मानं च निर्वीर्यां मन्यमानया दुःखं यापितः। इदानीं प्रीतिदायस्थिमात्रावशेषे वैव भिषजं मा भूदितीतः प्रस्थाप्यते। देहल्यां बन्धुमध्ये च वासं रोचयेत इदं चननिस्मर्तव्यमनीदृशाऽपि स्वस्य गात्राणां मन्ददर्शनया मन्थरगमनयापि तया सर्वेभ्यं सस्नेहातिरेकं नैरन्तर्येण सेविताः, ग्रस्माभिश्च सा न मानिता न वा तेषु तेषु क्षुत्येष्वनुमानिता। ग्रवधीरणानर्हापि सा ऽवधीरिता। जाने सा रूक्षाक्षरा ऽश्लक्ष्णवाग् दोषनाचेति स्वस्थाप्यसा नेदृशेति मर्षणीया। यदि तस्यां मधुरं ससान्त्वं व्यवहियेत, संभावना वचांसि च प्रयुज्येरंस्तदा सौख्यं दोषत्वं वा मायया जयादेन। यदि च नो जयात्वा नोऽनिः, ग्रस्मासित्वाचारः परिपालितो भवति, ग्राशीराशिश्च सम्प्राप्तो भवति। मया च प्रियः सत्यव्रतोऽयकुत्स्मारितः श्रीपरमेश्वरीलसन्तरामयोर्योऽयमभ्युदयः कालागतो मूलत्र मातुराशिष एव कारणम्। ग्राराधा प्रीता च माताऽऽशिषो ददाति मूरीति तदाराधनाय प्रीणनाय च यावीयत्नः। ग्रात्मनोऽर्थे नेच्छतिस्वाक्षिमतीति विदन्ते।

ग्रस्तु बहुश्रुतायां त्वयि न युज्यते वाक्प्रपञ्च ईदृश इति विरम्यते।

मदीयासस्य प्रथमेऽङ्गीतः प्रत्याय द्वितीयस्मिन् देहलीमाहात्म्य इति प्रवर्तिस्ते प्रियङ्करा भविष्यति। द्रष्टव्यं गेरे स्थितिर्मे सुखा ऽनुगुणा च स्यादिति संभावयन्विरमामि ते तातश्च

—बालदेवशशास्त्री॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अन्तर्देशीय पत्र
INLAND LETTER

Shrimati Usha, M.A.
3/54, Roop Nagar,
Delhi — 6

पहला मोड़ First fold

दूसरा मोड़ Second fold

तीसरा मोड़ Third fold

भेजने वाले का नाम और पता — Sender's name and address:—

Prof. Charu Deva Shastri,
c/o M/s. Moti Lal Banarasi Das,
Oriental Booksellers,
Nepali Khapra, Varanasi.
(U.P.)

इस पत्र के अन्दर कुछ न रखिये NO ENCLOSURES ALLOWED

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Varanasi,
7/3/61

My dear Satya,

I am just in receipt of a letter from you. I have already pronounced the contents of the letter from the Estate officer in my letter to you posted yesterday. If the plot is to be sold, we shall have to arrange for its sale before the 31st of this month. If it fetches us a reasonable price, we should sell it off; otherwise we should apply for re-allotment and submit a Plan for a residential house of a moderate size. This thing shall have to be done while you are at Chandigarh. I am enclosing herewith a letter authorizing you to execute the sale-deed on my behalf, and an application (only filled in) for re-allotment.

The allotment letter issued in our favour by the Estate officer, Chandigarh is numbered 23553/RP 5245 (In the Notice under reference it stands as 23553/RP 5375) dated 20/5/53.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

It lies in Sector 11 A, Street. G and is numbered 5. It measures 500 square yards approximately.

Your uncle, Mr. Jolly may help you; you may request him to accompany you to Chandigarh.

Yours affectionately,
Charandas
Shastri.

P.S.— I shall be sending you Special power of Attorney for the sale of the Plot by to-morrow's mail.

— C.D.

2. Meanwhile you may write to your uncle intimating your intended visit & requesting his company.

— C.D.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

I hereby authorize my son,
Dr. Satya Vrat Shastri, M.A., Ph.D.
to sell my plot at Chandigarh,
No. 5 in Street G, Sector
11-A, enter into a legal transaction
with a purchaser and receive the
proceeds of the sale on my behalf.

Charu Deva Shastri,
(Retired Prof. of Sanskrit)
270 Lakshmi Pura,
Jullundur City

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

डा० किशोरनाथ झा
अनुसन्धान अधिकारी

Digitized by Sarayu Trust Foundation and eGangotri

महानाथ झा केन्द्रीय संस्कृत विद्यापीठ
इलाहाबाद-२

दिनांक १६/१०/१९६६

स्वस्ति विद्यावदातान्तःकरणेषु श्रीमत्सु परमादरभाजनेषु
सादरं प्रणतयः।

सविनयमिदं निवेद्यते यत् पूज्यचरणानां गुरुवर्याणां प्रो० श्री अनन्तलाल ठाकुर महाशयानां आज्ञया मदीयं 'बापू' पुस्तकं सेवायां तत्रभवतां भवतां प्रस्तौमि। आशासे अखिलभारतीय प्राच्य विद्या सम्मेलनस्य धारवाड़नगरा धिवेशने स्वकीये साहित्यविभागाध्यक्षीयभाषणे यथास्थानमस्य चर्चां विधायात्मानुग्रहभाजनं मां विधास्यन्ति। सारस्वतव्याख्यानावसरेऽस्मिन् विद्यापीठे समागतैः पूज्यवरैर्भवद्भिः वार्तालापमेकदा कृत्वा भवतां सौमनस्यैरभिभूतोऽस्मि। आशासे 'बापू' पुस्तकं दृष्टिपूतं विधाय स्वकीयां सम्मतिं प्रेषयिष्यन्ति तथा कृतार्थं च करिष्यन्ति मामिति

भवतामेव विधेयः
किशोरः

CC-0. Prof. Satya Vrat Shastri Collection.

डा० किशोरनाथ झा
अनुसन्धान अधिकारी

Digitized by Sarayu Trust Foundation and eGangotri

प्रह्लादनाथ झा केन्द्रीय संस्कृत विद्यापीठ
इलाहाबाद-२

दिनांक १६/१०/१९६६

स्वस्ति विद्यावदातान्तःकरणेषु श्रीमत्सु परमादरभाजनेषु
सादरं प्रणतयः।

सविनयमिदं निवेद्यते यत् पूज्यचरणानां गुरुवर्याणां प्रो० श्री अनन्तलाल ठाकुर महाशयानामाज्ञया मदीयं 'बापू' पुस्तकं सेवायां तत्रभवतां भवतां प्रस्तौमि। आशासे अखिलभारतीय प्राच्य विद्या सम्मेलनस्य धारवाड़नगराधिवेशने स्वकीये साहित्यविभागाध्यक्षीय भाषणे यथास्थानमस्य चर्चां विधायात्मानुग्रहभाजनं मां विधास्यन्ति। सारस्वतव्याख्यानावसरेऽस्मिन् विद्यापीठे समागतैः पूज्यवरैर्भवद्भिः वार्तालापमेकदा कृत्वा भवतां सौमनस्यैरभिभूतोऽस्मि। आशासे 'बापू' पुस्तकं दृष्टिपूतं विधाय स्वकीयां सम्मतिं प्रेषयिष्यन्ति तथा कृतार्थं च करिष्यन्ति मां मिति

भवतामेव विधेयः
किशोरः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

देहलीतः
२।४।२७

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय पुत्रक, आयुष्मानेधि।

अद्य प्राह्णेऽहं तत्रभवन्तं नरेन्द्रनाथं चौधरीत्युपाह्वं वर्धापयितुमनास्तदीयं वेश्ममासदम्। इयं मे किंवदन्ती श्रवणे अस्पृक्षदसौ महाभागः प्रोफैसरपदे नियुक्त इति। परं तत्साक्षात्कारे सत्यज्ञासिषं नायमर्थो परिनिष्ठितविमर्शः साम्प्रतम्। अथवैवं वक्तव्यं विमृष्टोऽयमर्थो निर्णायकैर्निर्णयन्त नोक्त इति। श्रीराघवन् काणे प्रभृतयः प्राश्निका अत्र परीष्टिं निरवर्तयन्किल। श्रीनरेन्द्रनाथस्तु बलवदाशंसते तत्पदावाप्तय इति तन्मखवर्णादितः शक्यं प्रव्यक्तमुन्नेतुम्। अस्तु। स भवान्स्वयमेवोपाक्रंस्त त्वद्विषये वक्तुम्। आह तावत् — अहं विश्वविद्यालयतः पत्रमेकं प्रैरिरं यत्र सत्यव्रतो मामुपद्रक्ष्यतीत्युपन्यास्थम्। एतत् पत्रमतिक्रान्तेहनि त्वां प्रति प्रातिष्ठपम्। मन्ये श्वोभूते त्वामुपस्थास्यति। इदानीं स त्वयि सुतरामनुगुणः, इच्छति त्वां विश्वविद्यालये नियोक्तुम् इच्छति च त्वमिहागत्य नवमेऽप्रेलमासस्य वासरे प्रार्थनापत्रमर्पयेरिति। अत्रार्थे सिद्धिर्यथा स्यात्तथा प्रवृत्तो सावित्यपि समुत्साहायनः। तेन विश्वविद्यालयाधिकृतेषु त्वद्गुणग्रामो बहुतरकं प्रशस्तः, प्रत्यायितास्थेश्च ते त्वं पालीप्राकृतयोरप्यभिज्ञोसीति। तस्मा-

CC-0. Prof. Satya Vrat Shastri Collection.

दत्तौ कामयतेऽकालहीनमिहागत्य पालीप्राकृतयोर्यथाविध्यधीतिं प्रक्रमस्वेति। एवं ह्यसावनुमिमीतेऽप्रेलमासान्ते मईमासोपक्रमे वा प्राश्निकसंसत् समवैष्यतीति। ततोऽर्वागेव काचिन्नैपुणी तत्रावापनीयेति मुहुर्मुहुः प्रयुङ्क्ते। तेन गृहाय त्वरितव्यं त्वया। उषाश्चेच्चिरतरं तिष्ठासति कामं तिष्ठतु। न नो विरोधः।

पत्रमिदं शरीरे वेदनां वेदयमानेनास्वस्थचेतसा मया लेखीति स्खलत्प्रायाण्यक्षराणि कथं कथमपि प्रणीतानि वाक्यानीत्याभासयन्ति। सत्यं लेखो नाम मनः प्रतिच्छन्दको भवति।

अन्वायास्ते मम चोषसे सन्त्वाशिषो भूरयः।
उषसो जनन्यै मे प्रणतिर्वाच्या। एधतां ते मनोरथ इत्याशिषं प्रयुञ्जानो विरमति विदां विधेयश्चारुदेवश्शास्त्री॥

Digitized by Sarayu Trust Foundation and eGangotri

अन्तर्देशीय पत्र

इस पत्र के अन्दर कुछ न रखिये

डा० सत्यव्रत शास्त्री एम.ए., पी.एच.डी.
c/o
श्री हरिचन्द्र सेठ
१५ जटलर रोड
लखनऊ (यू०पी०)

पहला मोड़

तीसरा मोड़

भेजने वाले का नाम और पता :-
प्रो० चाहदेव शास्त्री
२३ एक, कमलानगर,
दिल्ली
मिष्टान्न नानेयम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Registered Letter

Digitized by Sarayu Trust Foundation and eGangotri

875

Shri Satya Vrat Shastri,
59, De Hostel,
B. H. U.
Banaras.

From
Prof. Charu Deva Shastri,
Panjabi Mohalla,
Ambala Cantt.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
१४.३.५५

प्रिय सत्य ज्योज्जीव्या नित्यं चाभ्युदियाः।

अद्य प्राह्णे प्रापं ते दलं सकारिकाव्याख्यम्। इदानीं यावच्छक्यं त्वरितव्यमवशिष्टस्यापेक्षितस्य विवरणस्य सम्प्रेषणे। अद्य कालविषयो निबन्धः साधीयः परिष्कृत्य समुपबृंह्य च प्रेष्यते। अधस्तान्निवेशितेषु केषुचिदर्थेषु सविशेषमवधातव्यं सुधिया —

१. प्रथमपार्श्वे टिप्पण्यां वाचस्पत्यकोषोद्धारोऽयमित्युपन्यासः। स तत्रत्य एव कोषान्तरस्थो वेति साध्ववधार्यम्।

२. द्व्यणुकम् इति पदं मया भाषान्तरेण न संगमितम्। तत्र मोनियर कोषोवलोकनीयः, रिक्तं च पूरणीयम्।

३. यत्र क्वापि पदं वा पदकदम्बकं वाऽधोरेखयाऽन्वितं कृतं तत्तथैव टाईपप्रतिलिप्यामपि स्यात्।

४. पत्रपार्श्वप्रान्तेषु यत्र क्वापि किञ्चिद् धृतं सर्वं तन्मध्ये पङ्क्तिं यथास्थानं निवेश्यम्।

५ पत्रपार्श्वे षष्ठे ३९ तस्याः कारिकाया व्याख्यायां 'व्यवहारं स्वात्तमनुपतन्ति' इति वाक्यांशो मेन विशदः। स्वात्तमिति पाठस्त्रिवेण्ड्रमपुस्तके। किं 'पदार्था अनुभवतो [illegible] इत्यर्थोऽर्थान्तरं वा। स्वात्तपदस्य कोर्थः। अत्र गुरवः प्रष्टव्याः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

स्यादेतदयं निबन्धष्षष्टिं पत्रपार्श्वानि व्याप्नुयात् यद्येवं स्यात्प्रियतरं नः स्यात् । अस्तु, यन्नाम मानुष्यकोपपाद्यं सर्वं तदुपपादितम् । शिष्टं च परमेश्वरेधि । अद्य दिग्विषयमुपक्रान्तोस्मीति मन्ये विंशाद्वासरादाऽऽवसाययिष्यामि ।

कियानप्यंशोऽस्य यावदेव टाईपाक्षरैरुपनिबद्धो भवति तावदेव डाक्टरमहोदयानां दृक्पथं नेयस्तन्मतं च ग्राह्यम् । तत्र वाक्यपदीय विवरण निबन्धन एव निबन्धांशो दर्शनीयः, वेतरः परकीयः ।

दिक्कालोभयविषयं पुस्तकमपि सममेव निबन्धेन प्रेर्यते ।

अम्बायास्ते सन्त्वाशिषो भूरय इत्युदीर्य विरमाम्यहं स्निग्धस्ते तात-

श्चारुदेवश्शास्त्री ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Dr. Satya Vrat,
Vyakaranacharya (Banaras)
Shastri, M. A. M. O. L (Pb.)
Ph. D. (Banaras)
Lecturer in Sanskrit,
Hans Raj College and
Department of Post-Graduate Studies,
Delhi University

Digitized by Sarayu Trust Foundation and eGangotri

देहलीतः
२४.११.५६.

मान्यास्तातचरणाः,

सप्रश्रयं वन्दे

अद्यैव श्रीमतां दलमवाप्तं वृत्तं च वेदितव्यं विदितम्। मदीये कृती अरोचयन्ताचार्यचरणा इति यत्सत्यं प्रसीदामि। एनयोः प्रकाशनमपि चाभ्युपयन्तीति साधु। हिन्द्यागल्योरनुवादे न ममाग्रहः। यदि विनैवानुवादं प्रकाशनं ते नुमन्यते तर्हि तथैव क्रियताम्। ग्रन्थविक्रयादि विषये तु त एव प्रमाणम्। हिन्द्यागल्यादि भाषान्तरकरणसहकारेण ग्रन्थमुद्रणे कलेवरवृद्धिर्जायत इति तत्राभिलाषो मेभूत्। परं सम्प्रति यथा विद्वांसो निर्दिशन्ति तथा करणीयमिति न तत्र मे द्वेधा मतिरस्ति अथ पुनर्ये ये प्रमादा, प्रवर्धनवशाद् ज्ञानवशाद्वा ग्रन्थद्वये स्युस्ते स्वयमेवाभ्यूहनीयाः शोधनीयाश्च। स्वैरं विधीयन्तां परीवर्ताः। यथेयं ग्रन्थद्वयी दोषजुष्टा न स्यात्तथा विधेयम्। सन्ति तु कानिचित् स्थलानि येषु तथा शब्दसौष्ठवं वर्तते यथा पदपरिवर्तने न दवति मनः प्रमादश्चाप्यस्तीति स्वदूयते च। तत्र किङ्करणीयम्। तं यदि नामाचार्यचरणाः परिवर्तयन्ति ह्येयुस्तर्हि तथैवाभ्युपेयम्। तत्सौष्ठवं माधुर्यं च

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

यथा नापहीयते तथा विधेयम्। इयमुभयतश्चाशा रज्जुः। अथ पुनर्व्यवहारानुगतेष्वपि प्रयोगेषु शङ्कन्ते शास्त्रिवर्यास्तर्हि ते तत्तत्प्रयोगसाधुत्वमवबोध्याः। विविच्यन्तां नाम ते ते विवादविषयाः। का त्रभीतिः। यदि तेषां दर्शनं सम्यगवश्यमेवाभ्युपेष्यतेऽस्माभिः। नोचेत्सर्वथा पार्थिकस्तेषामाग्रहः।

यथा श्रीमद्भिः संशोधितं प्रथमं पत्रं तथा मध्यं भृशं रोचते। तदपि पत्रेणानेन सममेवावेष्ट्य प्रेर्यते। शिष्टान् पञ्चाशच्छ्लोकान् प्रपि नातिचिरेण प्रेषयिष्यामि।

अस्मास्वेव स्थितिभाजः श्रीडा० सूर्यकान्तमहोदयाः श्रीमतो नमस्यन्ति। किमर्थं गताः पण्डितवर्यास्तस्मिन् स्थाने 'न यत्र दिवसं वसेत्' इति च मुहुर्मुहुर्व्याहरन्ति।

कुशलमन्यत्। मातृचरणानां प्रणामाः।

पत्रोत्तरं प्रतीक्षमाणः —

जशंवदा —

सत्यः

CC-0. Prof. Satya Vrat Shastri Collection.

श्रीः

Digitized by Sarayu Trust Foundation and eGangotri

श्रीव्याकरणजीवतोराज्यजानां विद्वद्वर्याणां
डॉ. सत्यव्रतशास्त्रिमहोदयानां सविधे
सादरं सश्रद्धं प्रणतिततयः समुल्लसन्तु ।

अयि महाभागाः,

"यो यस्य हृदये चास्ति दूरस्थोऽपि समीपगः" इति नीतिं प्रमाणी-कृत्वा, अपरिचितमामनुगृह्य स्नेहधारया पारिप्लावितं सौहार्दात् परिपूरितं वाक्यामृतं १४-९-१९६० मितात् पत्रात् संप्रेष्य प्रदत्तो गुणै-कपक्षपातितायाः परिचयः। मृगशावैः सममेधिताः कृतयं, प्रातस्मरणीयानां श्रीगुरुचरणानां चारुदेवानामङ्के संवर्धिता क्वयूयम्। तथापि संस्कृतस्योन्नत्यै द्वयोरावयो प्रतियत्न एक एवेति परस्परयोरैकात्म्यस्य कारणं भवेदिति विन्दे।

यदा श्रीकाश्मीरयुवराजाः कर्णसिंह महाभागाः नेपालभुवं सम-लङ्कुर्वन् तदा तैः किमपि संस्कृतविषये हृदयदाहिदुःखं प्रकटयितुं समयो दत्तः। स्वेन निबद्धं नाटकं तेषां करकमलयोः सादरमुपायनीकृतवानासम्। कृतज्ञतां प्रकटीकृत्य श्रीयुवराजैः प्रदर्शितमौदार्य्यम्। भवतु।

वैदिककालादारभ्य या संस्कृतस्याच्छिन्ना परम्परा प्रचलिता यदि सास्माकं वारे मध्ये त्रुटिता शृङ्खला चेदसह्योऽयमपराधो भविष्यतीति मत्वा करालेऽस्मिन् काले ऽपि निबद्धं नाटकमिदम्। किञ्च पुराणाचार्याणां मान्यतामुपेक्ष्य विंशत्यां शत्यां समाजे स्थितमन्तर्द्वन्द्वं प्रकटयितुं कृतः प्रयत्नः। सर्वकाराज्ञया यदा नेपालस्य सुदूरपश्चिमाञ्चले गतवानासं तस्मात् स्वेनैव मुद्रणस्य संशोधनं कर्तुं नाहमपारयम्। तेनाशुद्धिः बहुषु स्थलेषु दरीदृश्यते। तामशुद्धिं स्वयं [illegible] पुस्तकं पठेयुरिति प्रार्थयामि

[illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

श्रीः

Digitized by Sarayu Trust Foundation and eGangotri

श्रीव्याकरणजीवतोराज्मजानां विद्वद्वर्याणां
डॉ. सत्यव्रतशास्त्रिमहोदयानां सविधे
सादरं सश्रद्धं प्रणतिततयः समुल्लसन्तु ।

अयि महाभागाः,

"यो यस्य हृदये चास्ति दूरस्थोऽपि समीपगः" इति नीतिं प्रमाणी-कृत्वा, अपरिचितमामनुगृह्य स्नेहधारया पारिप्लावितं सौहार्दात् परिपूरितं वाक्यामृतं १४-९-१९६० मितात् पत्रात् संप्रेष्य प्रदत्तो गुणै-कपक्षपातितायाः परिचयः। मृगशावैः सममेधिताः क्वयं, प्रातस्मरणीयानां श्रीगुरुचरणानां चारुदेवानामङ्के संवर्धिता क्वयूयम्। तथापि संस्कृतस्योन्नत्यै द्वयोरावयो प्रतियत्न एक एवेति परस्परयोरैकात्म्यस्य कारणं भवेदिति विन्दे।

यदा श्रीकाश्मीरयुवराजाः कर्णसिंह महाभागाः नेपालभुवं समलङ्कुर्वन् तदा तैः किमपि संस्कृतविषये हृदयदाहिदुःखं प्रकटयितुं समयो दत्तः। स्वेन निबद्धं नाटकं तेषां करकमलयोः सादरमुपायनीकृतवानासम्। कृतज्ञतां प्रकटीकृत्य श्रीयुवराजैः प्रदर्शितमौदार्य्यम्। भवतु।

वैदिककालादारभ्य या संस्कृतस्याच्छिन्ना परम्परा प्रचलिता यदि सास्माकं वारे मध्ये त्रुटिता शृङ्खला चेदसह्योऽयमपराधो भविष्यतीति मत्वा करालेऽस्मिन् कालेऽपि निबद्धं नाटकमिदम्। किञ्च पुराणाचार्याणां मान्यतामुपेक्ष्य विंशत्यां शत्यां समाजे स्थितमन्तर्द्वन्द्वं प्रकटयितुं कृतः प्रयत्नः। सर्वकाराज्ञया यदा नेपालस्य सुदूरपश्चिमाञ्चले गतवानासं तस्मात् स्वेनैव मुद्रणस्य संशोधनं कर्तुं नाहमपारयम्। तेनाशुद्धिः बहुषु स्थलेषु दरीदृश्यते। तामशुद्धिं स्वयं संशोध्य श्रीमन्तः पुस्तकं पठेयुरिति प्रार्थयामि।

(अपर पृष्ठेऽपि द्रष्टव्यम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

यदि समुचितं पुस्तकं श्रीमतां दृष्टिकोणे स्यात् तदा प्रोत्साहनेन सद्कर्मणि प्रेरयिष्यन्त्येव। विश्वविद्यालये पाठ्यपुस्तकस्थाने स्थापयितुं समुचितं नवेति विचार्य पत्रप्रेषणसमये परामर्शो देय एव।

पुस्तकं "रजिष्टर्ड बुक् पोष्ट" द्वारा सादरं प्रेषितं विद्यते। भवत्-करकमलं समलङ्कृत्य पुस्तकमेव यदा नर्घ्यं भविष्यति तदा मूल्यस्य वार्ता दूरे गतेति विमृशामि। प्रेम्णा उपायनीकृतस्य वस्तुनो मूल्यं नास्तीति विश्वासमधिगम्य श्रीमन्तो ममेदं क्षुद्रोपायनं स्वीकृत्यानुग्रहीष्यन्त्येव।

अलमनल्पजल्पनेन, "क्षमासाराहि साधवः" इति वाक्यं स्मारं स्मारं संजातासु त्रुटिषु क्षमार्थं नाद्यं पिष्टपेषणं करोति। श्रीमन्तः क्षमां दास्यन्त्येवेत्याशास्ते —

विदुषां विधेयः —

चूडानाथ-भट्टरायः

प्राध्यापकः

नेपालराजकीय-संस्कृतमहाविद्यालयः

सं २०११ वैक्रमाब्दे आश्विनशुक्ल-द्वितीयायाम्।

पत्रप्रेषणाय संकेतस्थानम्-

८/३१५ प्यूखा टोल

काठमाडौं, नेपाल।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

ॐ

मोतीनाथ संस्कृत महा
विद्यालय रमेशनगर नव
देहली - १५
६।६।७५

मान्यमान्येषु शास्त्रिवर्येषु
सादरं प्रणमाञ्जलयो
विरचयन्ताम् ।

महोदयाः !

समाचारपत्रेण इटलीदेशे सम्पत्स्यमाने विश्वसंस्कृतसम्मेलने सभायाजकैः अस्माकं देशस्य भारतस्य निखिलानामपि संस्कृतविदुषां प्रतिनिधित्वेन तत्रभवतां श्रीमतां सादरमुपस्थितिः प्रार्थिता विदित इति ज्ञात्वा मे मनः हर्षप्रकर्षमनुभवतीदानीम् । स्माने खल्वयमुद्यमः ।

वस्तुतो भवन्तो न केवलं राजधान्या एवापि तु समेषामपि भारतीयसंस्कृतविद्याजुषां विद्वत्पुरन्दराणां प्रतिनिधयं स्वविलक्षण-पाण्डित्येन शीलदाक्षिण्यादिगुणवैभवेन च भजन्त इत्यत्र नास्ति लेशतोऽपि संशीतिः ।

नितान्तमेव प्रमुदितेन स्वान्तेन श्रीमतां सर्वतो भावेनाहं मङ्गलं कामये । ॐ शान्तिः शान्तिः शान्तिः

भवतामेव

जगन्नारायणपाण्डेयः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

सेवा में

श्रीयुत डॉ० सत्यव्रत शास्त्री
३/५४ सुरभि सदन
रूपनगर
दिल्ली - ७
पिन PIN ११०००७

पहला मोड़ First fold

तीसरा मोड़ Third fold

प्रेषक का नाम और पता :— Sender's name and address :—

जगन्नारायण पाण्डेय
मोतीनाथ संस्कृत महाविद्यालय रमेशनगर
नई दिल्ली - १५

पिन PIN ११००१५

इस पत्र के भीतर कुछ न रखिए NO ENCLOSURES ALLOWED

CC-0. Prof. Satya Vrat Shastri Collection.

Telephone No. 26747

Digitized by Sarayu Trust Foundation and eGangotri

I-56/4,000

॥ ओ३म् ॥

तमसो मा ज्योतिर्गमय

HANS RAJ COLLEGE
(Delhi University)

Delhi 9/1/58

प्रिय सत्य,

अद्यो डमडस्थपाठालया-
न्वयीनि पत्राण्यन्वेषमाणेन मया यदृच्छ-
या ऽधिगते अपरे ते छाया प्रतिच्छन्दके
प्रतिषेधार्थकं चैकमतिरिक्तम्। सर्वमिदं
समुदितमिहावेष्ट्य प्रहिणोमि कार्य-
सिद्धये। इदानीं स्वस्तिमत्युषा इति
वीतचिन्तेन त्वया शक्यं भवितु मिति
सम्पिण्डितमर्थमुदाहृत्य विरमति
वत्सलस्ते तातश्चारुदेवश्शास्त्री॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अवर्णनीय गुरुचरणकमलसौरभमाघ्राय निवेदयति यत्

कल्पतरु-
कल्पतरुकल्पलतयोश्चरणानुकम्पादायया निरातङ्कोऽयं भवतां
शिष्याजीवः। मन्ये च तत्रभवन्तः सर्वथा व्याधिविवर्जितसकलप्रिय-
दर्शनकलेवराः ईश्वरानुभवेन। अहं तु भवदीयजीवनगुणप्रसून-
सौरभानुसरणमात्रेण क्रियते इतविधिना। ❀ मन्ये निजं जन्म
सकलं तथापि योऽस्ति जीवोऽयं भावुकहृदयः। स्मरति च स्वकीयं
जीवनं शाखासमम् इत्यकारम् १— (शाखाचरैः वाक्यपङ्क्तौ)

प्रत्येकमूलोद्गमसञ्चितं तत्
कलेवरं स्वं नयनाभिरामम्।
परन्तु जाता कुरिलाः कृ धिग् धिक्
ते कण्टकास्तेऽहितशल्यतुल्याः ॥ १ ॥

अतः

सम्भोरुहप्रेरणया स्वपार्श्वं
प्रकम्प्य सार्कं तिमुमुक्षयाहं।
परन्तु नोत्पाटयितुं समर्थो
शोकस्य शङ्कुर्न हृदयप्रविष्टः ॥ २ ॥

तच्चक्षुःदुःखादजनीव पीडा
ग्रन्थिश्च तस्याःकलिकैव जातः।
यदा प्रफुल्ला नवपुष्पतुल्या
हसन्ति शाखाश्रयवैकस्य शोकम् ॥ ३ ॥

भ्रमद्विलासि भ्रमरांध्रयजनम्—
तीव्रप्रहृष्टसर्ववन्या।
मधुव्रतानीतविरक्तवर्णा
किं जीवितं धारयितुं प्रवीणा ॥ ४ ॥

अर्पयति लोकः कुसुमस्य शोकं
शाखं प्रफुल्लं परितो यथातरुः।
आधाय भेदाय निजाय तार्हि
वैलक्ष्यलक्ष्यात्मवती कृ साभि ॥ ५ ॥

दुःखं सुखकारणं मत्वाह

निशा निशार्धं न विनोदआशा
विना विवासां न जलेरुहा पानम्
किं शोचते किञ्चिदहो विनाऽऽत्
तद्दुःखमूलं हि सुखप्रसूनम् ॥ ६ ॥

परन्तु निराशस्य संस्कृतसाहित्यपरायणस्य न विरमति :-

निशाशजीवे नहि काचि भीतिः
यथान्धकारात्स किमन्धकारः।
प्रत्यानयनात् किं विपिनस्थदेशः
पादाहतात् किं नु विभेति पन्थाः ॥

अतः परमपि करुणम्—

क्षुब्धार्णवात्मा करुणारसस्य वेगाद्
न कापि वीचिः पतितप्रवाहे।
कलो न कूलेषु तरप्रपाते
नावर्त उग्रः स्खलिते निमूढे ॥

मनसि च सकलविदग्धजनललितललाटभूता अस्य स्ववेदना आगकीनामे-
वगन्तुं क्षमाः। अस्य विश्वविद्यालयो कोऽपि दोषो नास्ति। जगतः स्व.श्र.कस्यापि
न अतो। भयानकः कर्मण्डस्य (अधिकारस्य) स्थितिर्दोलायमानास्ति।

किं करोमि क्व गच्छामि [illegible]. भवन्ते स्व प्रमाणं मदीयजीवन-
दुःखविषये विचारयितुम्। दुःख ईश्वरस्य चिन्तनं मामकीनस्ति।
त्रुटयः क्षम्या मन्दधियश्चरस्य मम।

भवताऽनुचरः शिष्यः
बद्धदेवः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

बुद्धदेव शर्मा · Budh Dev Sharma
Lecturer in Sanskrit Department
Gurukul Kangri University
P.O. Gurukul Kangri
Distt. Saharanpur. (U.P.)

अन्तर्देशीय पत्र
INLAND LETTER

To,

Dr. Satya Vrata Jee
(Reader in Sanskrit Dept.)
Arts Faculty
DELHI UNIVERSITY
DELHI

पहला मोड़ First fold

तीसरा मोड़ Third fold

भेजने वाले का नाम और पता :- Sender's name and address :-

इस पत्र के अलावा कुछ भी न भेजें NO ENCLOSURES ALLOWED

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम श्री सत्यव्रत जी

पता २३ एफ कोल्हापुर रोड

डाकख़ाना कमला नगर

ज़िला दिल्ली

Delhi

CC-0. Prof. Satya Vrat Shastri Collection.

काशीविवि दीपावलीसंख्या

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय श्री सत्यव्रत जी,

प्रकाशपर्व दीपावली

की शुभ कामना के लिये

आभारी हूँ। भगवान्

करे आपके द्वारा

आगामी वर्ष में नई

साहित्य साधना का सूत्र-

पात हो। मैं ६ नव०

को दिल्ली में रहूँगा।

CC-0. Prof. Satya Vrat Shastri Collection.

साधवाक्षमत:

• होलीयारपुराण

Digitized by Sarayu Trust Foundation and eGangotri

अभि प्रिय!

स्वस्त्यस्तु । शुभमस्तु ।

पत्रमध्यात्मपद्मस्य प्रेषयस: प्रीतिमत् परम् ।
दत्तानामधिगमेष्टं वर्षं दृष्टिमुपागमम् ॥१॥
अष्टादशां तिथावद्य मासस्य घटिते दले ।
भवता ऽस्पष्ट निर्देशादहं पर्याकुलीकृत: ॥२॥
मया राज्ञावबोधार्थं तृतीयं ज्ञातकं प्रिय!
रथोद्धताख्य वृत्तेन निबद्धं सुमनोहरम् ॥३॥
त्वत्पार्श्वे प्रेषितं प्रीत्या मत्तेनत्य गरीयसा ।
अतिक्रान्तात्य मासस्य वासरे पञ्चविंशके ॥४॥
अमुष्यानुपलम्भस्तो ऽभवद् कस्मादतर्कित: ।
इत्यहं मा स्थिरं चिन्ताचालत्वान्तो ऽतिखिन्नधी: ॥५॥
इदानीं तु प्रियं पत्रमधिगम्य तवोत्तमम् ।
प्रसीदामितमामक्ष मित्रात्मपत्रदत्तमानस: ॥६॥
जायुस्तुद्वारहीनं श्रेय: प्रीतिविवर्धनं: ।
मानसे मे स्थितश्चौदो व्यालत् सकलो ज्वर: ॥७॥
भ्रान्तिरेवेदृशी जाता त्वत्पत्राधिगमात्मम ।
प्राक् तृतीयस्य प्राप्तिं नोदयादुं मतस्तथा ॥८॥
साम्प्रतं तत्पत्रेण वीतचिन्तो व्यधायहम् ।
जाते वाक्यन्यसंदर्भे क्षमायाम्तु कथैव का ॥९॥
अनाम: सर्वथैवासि विजयस्व निरामय ।
सरलप्रकृति: श्रेयन् ! श्रेय: प्राप्नुह्यनुत्तमम् ॥१०॥
त्वदुदिष्टे दिने नूनमुन्मदनथाख्ये ज्ञातकम् ।
मुदित: प्रेक्षयिष्यामि राज्ञि प्रीकृत मुज्ज्वलम् ॥११॥
श्लोकानां तत्र विन्यासं पञ्चाशच्छतकं क्रमम् ।
निबद्धं यत्नतश्च श्रुत्यन्तिवज्रो पजातिभि: ॥१२॥
श्लोकसंख्या ऽभवत्पूर्वमतीते ज्ञातके त्रये ।
नवशतिं शतं श्लोकं संहृत्येदंव गम्यताम् ॥१३॥

विंशत्या सहितं श्लोकशतं ज्ञातचतुष्टयम् ।
श्लोकानां पञ्चशत्यांतु ज्ञातमेतावदीर्यते ॥१४॥
चतुर्थं ज्ञातकं विद्धि कुणालं चारुविस्तरम् ।
नातुलक्ष्मटं मन्ये चिरकालव्यपेक्षणात् ॥१५॥
विंशद्या सहितं श्लोकशतं ज्ञातकम् ।
लघुत्वादनुवाचं स्यादुच्चशीर्षापदं महत् ॥१६॥
श्लोकानां पञ्चशत्येवं मानेनैव भविष्यति ।
अर्थौघं स्पष्टमुद्दिश्यमकटं नौन सेत्स्यति ॥१७॥
अहं दिनानि चत्वारि गनाम्यि स्थितिकेतनम् ।
लब्धावकाश: संख्यानान्तवाक्योपयुमे शुभे ॥१८॥
तत: प्रीतिवतैव मया निष्किंचनचेतसा ।
तिथौ प्रदेष्यते ऽस्माभ्यं मुन्मदनी कथानकम् ॥१९॥
संकेतो पूर्यते दिल्ल्यां विश्वविद्यालयस्य हि ।
अतस्तेनैव मे पक्षवादो भविष्यति ॥२०॥
आस्तां तावदियं चर्चा तातपादस्य चिन्यताम् ।
नक्षमान्तु प्रवक्षस्यामि संक्षेपं संकुचाश्रितम् ॥२१॥
प्रतिदानार्थकं कालक्षेपं कर्तुमहं कारणम् ।
भगवन्मुखया वाचि निवेद्य निवसेत् बुधालो निवम् ॥22
एतदर्थं तु विद्वांसो ब्रह्मचर्यानुकाम् ।
याचेहं परमात्मानं सम्पूर्णं पुलकाश्रुकम् ॥२३॥
स एव भगवान् सद्य: स्वास्थ्यं लाभ्यं करिष्यति ।
तत्प्रीत्यालम्बनेनैवायं नैष: कालक्षेप: कृतात्मभि: ॥२४॥
पुत्रलक्ष्म: किमुच्येत, सपुत्रा कुशलिन्यलौ ।
माधव रमता नीडो स्वस्वतन्त्रव्रततत्परा ॥२५॥

इति

CC-0. Prof. Satya Vrat Shastri Collection.

कुमारसंभवे काव्यानन्दे पुष्पके श्लोके को
क्ति ललिते इत्यस्य व्याख्याने काशीराजकला

Digitized by Sarayu Trust Foundation and eGangotri

इति समस्तं पदेकृत्य परिवर्तनीयम् । यतो हि—
काशी नाम पुरा राष्ट्रं राज्यं वाऽऽसीत् । वारा-
णसी च तदन्तर्गता नगरीति । इदानीं तु सर्वथा
विपर्यस्तमिव । तत्र काशीराज्ये ललामभूता
वाराणसीति पुरी प्रसिद्ध्यति । वराणस,
वनारस इति च व्युत्क्रमः स्पष्ट एव । कोशेषु
वराणस - वाराणस इत्युभयथाप्यधीयते ।
तत्र स्वयमेवार्थसतत्त्वं वेदितुमलं कर्मीणाः
श्रीसन्त इति न बहु प्रपञ्चमञ्चति । अन्यत्रापि
यथेच्छं स्वमनीषिकया परिवर्त्तिं कर्तुमर्हन्ति
सन्त इत्यप्यावेदयामि । तथापि मया याव-
च्छक्यं परिवर्त्त्यसहान्येव पदान्युपनिबद्धानि ।
अस्तु ॥ शिशुद्वयमप्युच्चाभिः शुभाशीर्भिः
समभ्यर्चनीयं महचनादित्युक्त्वा
भवामि विरतवचाः ।

भवदीयः—
विद्यानिधिः शास्त्री
व्या. आ.
२८/१२/५९

अनादेशीय पत्र

इस पत्र के अन्दर कुछ न रखिये



सेवा में—

श्रीयुत डा. सत्यव्रत जी एम.ए.
प्रो. संस्कृत विभाग
C/o ~~दिल्ली विश्वविद्यालय~~
10A/22 Shakti Delhi दिल्ली

भेजने वाले का नाम और पता :-

CC-0. Prof. Satya Vrat Shastri Collection.

काशी विश्ववि० ३।१२।५६

Digitized by Sarayu Trust Foundation and eGangotri

प्रियश्री सत्यव्रतजी,

२।१२।५६ का पत्र

मिला। वाक्यपदीय जैसे प्रकाण्ड ग्रन्थ के मूलपाठ और अर्थों के उद्धार में आपने समय देने का निश्चय किया है यह जानकर हृदय प्रसन्नता से भर गया—

एवं ते भाषमाणस्य पद्मा श्रीरुपतिष्ठताम्।

प्रतियोंकी सूची देखी। उनके सम्बन्ध में क्या कर्तव्य संभव है इसपर विचार किया जायगा। यहां के विश्वविद्यालय के सहयोग का प्रयत्न करूंगा। तबतक जो सामग्री आपके पास हो कार्य प्रारम्भ करदें।

१४-१५-१६ को दिल्ली में रहने की संभावना है। श्री मैथिली शरणगुप्त (६ नार्थ एवेन्यू) के यहां फोन पर मालूम कर लें।

आपका

वासुदेवशरण

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

जवाबी

केवल पता

नाम श्री सत्यव्रत जी

पता २३ एफ़ कमलानगर

डाकख़ाना दे हली

ज़िला

CC-0. Prof. Satya Vrat Shastri Collection.

श्रीचारुदेवशास्त्रिन् महाभाग

Digitized by Sarayu Trust Foundation and eGangotri

सबन्धुं भवन्तं भगवान्भवो भद्रेण भव्येन संबध्यादि
त्याशासानः किमपि प्रत्याख्यास्यामि अनभिप्र
मन्नपि तदनलं भविष्णोर्मेऽनागमनागोऽगण
नीयमिति मुहुरभ्यर्थये।

अवादां भावकत्वं पत्रम्। विदितार्थसार्थश्चा
हम्। प्रवासप्रयासभीरुस्वान्तपरतन्त्रः का-
यो न निकायाद् बहिर्यियासति। अस्वास्थ्यञ्च
तत्र सहकरोति। आयुष्मतः श्रीसत्यव्रतस्य
परिणयस्तु जगदनेनयन्त्या अखिलानसः करुण
याऽवार्यवीर्यया [illegible] भवितेति संकल्प

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

सुलभोमम सायोडाम
लाषः। किञ्च कायेना
नुपतिष्ठन्नपि तत्र
तदनेहसि चेतसाश
मभिलष्यन् संनि
धातास्मीति वल्गु
फल्गु च निवेद्य
विरमामि

रघुनाथशर्मा
१०-३-५७

पोस्ट कार्ड
साथ का कार्ड जवाब के लिए
केवल पता

पं० श्री चारुदेव शास्त्री
नाम
२३ एफ. कमलानगर
पता
देहली - ६
डाकखाना
ज़िला

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Tel. No. 47796

10, Curzon Road, N. Delhi

मत्थे बिन्दी - मलां गुलाली
बुल्लां ते मैं सुर्खी लावां
भरी जवानी डुल डुल जावे
कि कण टोणूं होर दिखावां
कंघी फेरां बान बनावां
बन्न सवन्ने लीड़े पावां
दर्पण मोहरे खड़ खड़ वेखां
प्रखीं पा कोजल मरकावां
तेल मुसकुणा सिर नूं लाके
बहुवा मोड़े तेल लटकावां
गल बिच कण्ठी पैरीं सैण्डल
ठुमक ठुमक टुरदी टुर जावां
प्रगे वेखां पिच्छे वेखां
चार छफेरे झाती मारां
प्रर तूं मैंनूं किते न दिसें
प्राखिर ढिल्ले बुल मुड़ आवां
मैं भुल्ली मैंनूं पया भुलेखा
लभण जावां मुंह दी खावां
झाती मारां जग दिल अन्दर
हूबहू तेरे दर्शण पावां
दिल दरिया समुद्रों डूंगा
डुबकी खावां थीह न पावां
कोई मेरे पिच्छे आवे
मैं किते दे पिच्छे जावां
सदैव हृदयमन्दिर में विराजमान रहने पर भी शायद आप इस बात का अनुमान नहीं लगा सकते कि मुझ पर क्या बीत रही है। जिन दिनों के लिए दुनियां तरसती है वैसे दिन आने पर भी हम इन दिनों को किस तरह बिता रहे हैं यह सोच कर दिल टुकड़े टुकड़े हो जाता है क्या हमारे जीवन का रस इसी तरह घुट घुट कर जीने के कारण सूख नहीं जायगा? यह वही सीमा है शायद, जहां आकर पैसा मनुष्य का शत्रु बन जाता है। हम अपने सुनहले दिन तो किरद की आग में झुलस कर बिता रहे हैं जब यौढ़ावस्था आ जायगी तब बुढ़ापा पड़ जायगा तब तो [illegible] क्या क्या बीमारियां लग जायंगी। फिर मुक्त हंसी भी तो नहीं हंस सकते। सुख दुख के समय तो लोग कहते हैं जितने सम्बन्धी अपने पास हों उतना ही अच्छा है लेकिन मेरा अपना आदमी ही मुझसे दूर है तो मेरी क्या दशा होगी। मैंने आपको दो पत्र लिखे थे जिनमें से एक में मुन्नी के बारे में लिखा था। इतने दिन जो पत्र नहीं लिखा वह भी मुन्नी के ही कारण। मैं लिखना नहीं चाहती लेकिन दुःख जब इतना बढ़ जाता है कि आधे व्यक्तित्व में नहीं समाता तब तो पूर्ण व्यक्तित्व को उससे अवगत कराना धर्म सा हो जाता है और फिर अब तो भगवान की कृपा से दुःख टल ही गया है। आपके [illegible] ही दिन मुन्नी को दस्त आने शुरू हो गये थे... और चार दिन तक लगातार वह दस्त और बीच बीच में उल्टियां करती रही अब तो बहुत कमजोर हो गई है। जितनी आप देख कर गये थे उतनी ही रह गयी है। चार दिन छोड़कर चार रातें - यहीं मैं यह भी झूठ ही मैंने लेट कर गुजारी हैं तो यह भी झूठ होगा, क्योंकि सोना लेटना तो दूर रहा मुन्नी को लेकर चलना पड़ता था तब कहीं वह थोड़ा सा टिकती थी नहीं तो बस रोना। पेट में इतनी दर्द होती थी कि एक मिनट भर नहीं सो पाती थी। यदि मैं थक जाती थी तो पिताजी ले लेते थे पिताजी बेचारे भी बहुत बेचैन रहे, कहते थे हमने तो अपनी ओर से कोई कसर नहीं छोड़ी अब क्या किया जाय। लीन डाक्टर को दिखाया था, अब कोई भारिया डाक्टर है उसकी दवाई से आराम मालूम होता है पहले एक दिन एक होम्योपैथिक डाक्टर को दिखा कर आये फिर दो दिन लगातार एक जनी शाह के यहां चक्कर लगाये वहां से भी फायदा नहीं हुआ तो अब तीसरा डाक्टर आजमा रहे हैं बीस को इलेक्शन के कारण छुट्टी थी २१, २२ को बड़ी मुश्किल से कॉलेज जा पाई कोई नहीं वर्ना इतना था इस लिए जाना जरूरी था लेकिन आज और कल की मैंने छुट्टी ले ली है, प्रिंसिपल नाराज तो बहुत होंगी लेकिन [illegible] किया भी क्या जाय और कोई चारा भी नहीं है। इस समय मुन्नी सोई हुई है तो मैं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पत्र लिख रही हूं। हमें पेपर 28, 29 जुलाई को खत्म हो जाएंगे लेकिन 31 से फिर परीक्षा शुरू है। मैं हर रोज टाइम टेबल शीट बनाने वाली टीचर से अपनी ड्यूटी के बारे में पूछती हूँ लेकिन अभी तक उसने बताई ही नहीं। दूसरी मुश्किल यह है कि यदि मेरी एक दिन में दो ड्यूटियां पड़ गई तो पीछे सुनी कितनी देर लग जाएगी। अभी हिमाचल जी कहती हैं कि इतने दिन छोड़ के जाती रही हो इसीलिए बीमार हुई हैं। आप यदि यहां 28 को आयें तो भी ठीक है लेकिन यह बात तभी निपट सकती है यदि 31 और 1 की छुट्टी लें और छुट्टी लेने का मतलब है कि पूरी फीड्स का पैसा जो वैसे ही चढ़ा हुआ है और चढ़ जाएगा। मेरा मन तो कुरुक्षेत्र में आपसे इतनी गर्मी में इतना दौड़ करने को सोच कर दहल उठता है। मैंने पत्र के लिए और मच्छरदानी के बारे में आपसे पूछा था आपने कोई उत्तर नहीं दिया। शरीर तो मेरा यहां किसी न किसी तरह दिन रात्री कर ही रहा है लेकिन आत्मा चारों एजमल्ल के उस छोटे से कमरे में और फिर वो नाला गाऊस के चारों ओर बेचैन हो कर चक्कर लगाया करती है। पता नहीं इसे कब शान्ति मिलेगी। मुझे छोटे से शहजाद की देख भाल करनी है। बस मैं तो अपने को इसी कार्य में लगाई हूँ और आज कल जब मैं इतनी बार लड़ने पर भी वह कार्य अपने हाथों से नहीं कर पाती तो मुझे अपना जीवन निरर्थक सा लगता है। इससे तो मेरा मर जाना ही अच्छा है। हे भगवान हमें कम से कम जल्दी

अन्तर्देशीय पत्र

इस पत्र के अन्दर कुछ न रखिये

10 NP INDIA

Dr. Satyavrat ji

Senior Lecturer

23-F. Kamla Nagar, ~~Raj Mahal~~

DELHI ~~KURUKSHETRA~~

तीसरा मोड़

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

DR. M. M. PATKAR
Ph., D.

EDITOR
Poona Orientalist.

"RAOJI NIVAS"
631/37 Madiwale Colony
Poona 2.

Date 13.3.1961 19

Dear Dr. Satya Vrat,

Please refer to your p.c. dated 9th March, 1961. I am glad that you are bringing out a volume of your articles published in various journals. I have no objection to your articles originally published in the 'Poona Orientalist' being included in the proposed volume. I hope your book of collected papers will appear in print ere long.

With kind regards,

Yours sincerely,
M. M. Patkar
(M. M. Patkar)
Editor

Dr. Satya Vrat, M.A., M.O.L.
Ph.D.
3/54 Rupanagar,
Delhi-6.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

॥ श्रीः ॥

विद्यावाचस्पति पण्डितराज श्री काली प्रसाद मिश्रः
व्याकरणाचार्यः
भूत पूर्व प्रिंसिपल संस्कृत महाविद्यालय
का० हि० वि० वि०

सम्मानितप्राध्यापकः
वाराणसेय संस्कृतविश्वविद्यालयस्य
डी १/६ सरस्वती फाटक
वाराणसी।

श्रीमन्तः परमस्नेहभाजोऽनवद्यविद्याविद्योतमान
महनीययशोराशयो भाग्यवन्तश्चारदत्त
शास्त्रिणः सन्तु शुभावाचः

वहोः कालान्यशामयमहं श्रीमतां स्पृहणीय
चरितोऽधिगतानेकशास्त्ररहस्यो व्याकरणा-
चार्योऽपि प्रतिभावान् कविरेषवास सत्यव्रतो
नाम सूनुः स्वीयेनालौकिकविद्यामाहात्म्येन
वशीकृतैर्विश्वविद्यालयाधिकारिप्रवरैः स-
त्कृत्य नियोजितोऽस्ति संस्कृतमहाविद्यालयस्य
महनीये प्रधानाचार्यपदे।

श्रवणानन्तरमेव जातो मयि महान् प्रमोदप्रवाहः
किन्विदानीमपि श्लाघ्यं तत्पदमलङ्कर्तुं नाभि-
लष्यतीति श्रावं श्रावं नितान्तं विषीदामीति
पञ्चायकैशरिणं महावैयाकरणं भवन्तं सम्बो-
ध्य निमित्तस्यावगत्यै प्रतिबन्धकसं
सर्गाभावं विधूय प्रार्थितपदालङ्करणाय
च प्रेरयमाणो भवदीयसूनोः प्रखरप्रतिभा
प्रभावं साक्षात्कृत्य यशोगन्तुं कामयते भवताम्

मि० फा० पु० १३
वि० सं० २०२५

काली प्रसाद मिश्रः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Pandey,
M.A., PH.D., D.LITT., M.O.L., SHASTRI
Professor of Sanskrit

Digitized by Sarayu Trust Foundation and eGangotri

Lucknow 22 - 5 1959.

Dear Dr. Satyavrat

Many thanks for your gift of a copy of your learned paper on the Conception of space in the Vākyapadīyam. I have gone through it and have been impressed by its soundness of judgement. Amendment of the text suggested by you seems to be right. The distinction, drawn between Deśa and Ākāśa and comparesion with the Vaiśeṣika thought are interesting. It is a good subject and it will establish your reputation if you could offer a systematic view of the Philosophy of grammar.

I am approaching Bhartṛhari from critical point of view in the light of the monistic Śaiva Philosophy of Kashmir in the second edition of my Abhinavagupta in hand.

I am enclosing herewith the summaries of the two volumes on Comparative Aesthetics, recently published for your careful study and reaction.

Kindly convey my best respects to dear Śastri ji. How is your University developing? Yours sincerely
with best wishes to you both.
K C Pandey

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बायास्ते
१४।४।५५

प्रिय सत्य ज्योग्जीव्या नित्यं चाभ्युदियाः।
पूर्वतरेहनि प्रापं ते लेखम्, अवेदिषं
च वृत्तम्। इतश्चण्डीगृहं गतास्ते सुजना
इति तत्रोपेत्य द्रष्टव्या इति यदवोचस्तन्नाह-
मनुमन्ये। नेदमस्मदर्थस्योपकृतये भवि-
ष्यतीति जाने। अनिरुक्ते मदागमकारणे
निरुक्ते वा नहि किञ्चित् तिरोहितं
स्थास्यति तस्य प्रातिभस्य। अनुक्तं
चात्र दुरुक्तं भवत्यन्यथा चोक्तोथ दुरुक्त-
तरम्। सहसा तदुपगमस्तत्र चण्डीगृहे
शङ्कामेव जनयिष्यत्यनिष्टाम्। सा
परिहार्या। अस्ति मे वाराणसीं प्रत्या-
यियासा। विंशेहनीतः प्रस्थातुमीहे।
सप्ताहं च तत्रावस्थातुं कामये। अस्ति
मे श्रीरघुनाथप्रभृतीनां विज्ञानां
दिदृक्षा बलवती। यदि ते महान-
भावा अपि तेष्वहःसु तत्र भवेयुस्तदा
तैरपि स्वैरं संगन्ताहे, स्वार्थे च
प्राप्तावसरं वक्ष्ये। अयमेव पन्थाः,

इतरस्त्वपन्थाः। अत्र विषये स्वं मतं
निर्वक्तव्यम्। अपि नाम महावैयाकरणाः
पण्डितपुङ्गवाः श्री ब्रह्मदत्तजिज्ञासव-
स्तत्र स्युः। तानपि दिदृक्षे, तैरपि
समं कामपि कालकलां नेतुमिच्छामि।
पुस्तकालयेषु पुस्तकविक्रायाणां सङ्ग्रहेषु
च पुस्तकानि च विविधानि मे दृश्यानि।
एवमल्पीयांसमेतमनेहसं यथोद्दिष्टं याप-
यित्वा त्वया सहैवाष्टाविंशेहनि ततो
वाराणसीतः प्रतिप्रस्थास्य इति मे
कामः। मन्ये त्वमपि तावता कालेनाव-
सितकृत्यः प्रस्थानोन्मुखो भविष्यसीति।
इहं सर्वं सुस्थम्। सौस्थ्यं च ते भगवन्त-
मीशमभ्यर्थयमानोहं विरमामि वत्सल-
स्ते तातश्चारुदेवश्शास्त्री॥

अम्बायास्ते सन्त्वाशिषो भूरयः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अन्तर्देशीय पत्र

इस पत्र के अन्दर कुछ न रखिये

श्री सत्यव्रत शास्त्री
३४, डे होस्टल,
बनारस हिन्दू विश्वविद्यालय
बनारस

पहला मोड़

दूसरा मोड़

भेजने वाले का नाम और पता :-

प्रो० चारुदेव शास्त्री
पंजाबी मुहल्ला
अम्बाला छावनी

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्यानुभाषिणि! यत्तं ते पत्न्यान्तरेण सह चरितमपि, वत्तं चागेदि। बाढमभिष्टौति प्रियो धर्मपाल स्तां कन्यकामिति सत्यं सैवंगुणा भविष्यति। नहि धर्मपालो मृषोक्ता ऽतिसन्धास्यते नः। न हि तच्छीलो सौ। तथाप्यचिरेण लूचियानां गत्वा सर्वं साक्षात्करिष्ये। मया डाकुरमहोदयो विज्ञापितो ऽहमागमिष्यामि। सोऽस्तु ब्रूते ऽभवतामिह सन्निधानमिति प्रतिवचो ऽपे डाकुरस्य हो चिगतम्।

प्रस्थालीये यदुक्तं तत्समस्तं विन्यस्यामि। सपत्नीको दीवानमहाभाग स्तदहः पितृव्यस्य ते सदनमासदन्निमन्त्रितः। पितृव्येणैव ते समं कामपि कालकलां समलापीत्। दीवानदारा स्तवल्पीयो वेतनं सत्यस्येति व्यक्तमवोचन्। दीवानस्तु प्रत्यमोचं तस्य सेवाचतेः, प्रकर्षमेत्य ति वत्तं गच्छता कालेन, सन्ति परे व्यवसराः समुत्कर्षस्येते समाधानो ऽभूत। प्रत्याव्रास्यामि भ्रातरमिति पितृव्येण ते पृष्टो दीवान आह — प्रानन्तसरं ग्रस्ता ऽऽकारणा। प्रस्माभिस्तावच्छालोनो मन्तव्यो मन्तेः- [illegible], स वेह न सन्निधत्त इति विद्मो वयं ते भ्रातृव्येण। बहुशश्चिन्तितो ऽयमर्थो मया। उच्चैस्तरेण रसामर्चितेनान्नवायेन नोभिसम्बन्धो नः समुत्कर्षतीत्येकः पक्षः। उच्चैरास्पदप्रतिलम्भेपि महीयो विचारप्राधान्यङ्गीकृतं गाम्भीर्यादिति नासंभवि। परमेतादृशो कुले संभूता कन्यका विनीता भविष्यति, नम्रा वोदुता वा, स्वापरा सेवापराङ्मुखी वा, बन्धुषु भक्तिमती वा ऽनिरपेक्षा वेति सन्देहास्पदमो र्थः। त्वय्यनुगुणं नेतीते प्रतीपमिति सावलेपा यूहं निरयीक्षयादित्यपि शङ्क्यते। सर्वथा ऽन्यादृशो स्माकमाचारो विचारश्च तदन्नमानितादाचाराद् विचाराच्च। तेन सर्वं साध्वालोच्य प्रक्रमः कार्यः। मा स्म वयमस्थाने पतिषाम।

लूचियानातः परापतितोहमचिरेण सूयो विशदं लेखितास्मि। इदानीं कीदृशी ते शरीरसमवस्थेति जिज्ञासे। किं व्यायनुं प्रवृत्तो सि? यावद्य न व्यायंस्यसे तावन्ते गात्राणि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

दृढसन्धिबन्धानि सुश्लिष्टानि
कान्तिमन्ति च न भविष्यन्ति।
पथ्याशी व्यायामी स्त्रीषु जितात्मा
नरो न रोगी स्यादित्यायुर्वेदाचार्य्या
णां डिण्डिमं किमिति नाद्रियसे?
पुत्रक! अद्य प्रभृति व्यायन्तुमार-
ब्धोस्मि, स्वदते मे व्यायाम इति
प्रवृत्तिप्रेषणेन कदा मे श्रवणे
प्रह्लादयिष्यसि? चिरं सुखामेवं-
भूतां प्रवृत्तिमुदीक्षमाणस्य मे।

अद्य प्रायेण मासत्रयं श्रीविद्या-
निधिना वत्तो रूप्यकाणां शतत्रय्या
ऋणमिति गृहीतायाः। प्रतिमासं
शतं मुद्राः प्रतिदास्यामीति तेन प्रति
ज्ञायापि नाद्यापि किमपि प्रैषि।
त्वरिततरां तस्मै सुजनाय पत्रं प्रेर्यं
विज्ञाप्यश्चासौ सपदि ऋणविगण-
नम्। अत्र विषये प्रमादः परिहार्य
इति भूयोभूयस्त्वां प्रयुञ्जानो वि-
रमाम्यहं वत्सलस्ते तातश्
चारुदेवश्शास्त्री॥

पहला मोड़

अन्तर्देशीय पत्र

इस पत्र के अन्दर कुछ न रखिये

डाक्टर सत्यव्रत शास्त्री एम.ए.
पी.एच.डी.
२३ एफ, कोल्हापुर रोड
कमला नगर
दिल्ली — ६

तीसरा मोड़

दूसरा मोड़

भेजने वाले का नाम और पता :-
प्रो० चारुदेव शास्त्री
साधु आश्रम P.O.
होशियारपुर

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Preliminary Ceremonies.

First Adhyāya. First Brāhmaṇa.

He the (Adhvaryu) cooks the priests' mess of rice[2] (ब्रह्मौदन): it is seed he thereby produces. Having greased a rope with the ghee which is left over[3], he takes it; for ghee is (a type of) fiery spirit, and the horse is sacred to Prajāpati[4]: he thus endows Prajāpati with fiery spirit. Impure & unfit for sacrifice indeed, is that (animal), to wit, the horse.

2. The rope consists of darbha grass, for darbha stalks are a means of purification: he thus purifies that (horse) and immolates it as one purified and meet for sacrifice.

3. Now when the horse was immolated, its seed went from it and became gold[1]: thus when he gives gold (to the priests), he supplies the horse with seed.

4. Prajāpati produced the sacrifice[2]. His greatness departed from him and entered the great sacrificial priests[3]. Together with the great priests he went in search of it & together with the great priests he found it: when the great priests eat the priests' mess of rice, the sacrificer thereby secures for himself the greatness of the sacrifice. Along with the priests' mess of rice he presents gold (to the priests); for the mess of rice is seed and gold is seed; by means of seed he thus lays seed into that (horse & sacrifices). It (the gold) weighs a hundred (grains), for man has a life of a hundred (years) and a hundred energies: it is life, energy, vigour, he lays into his own self. At midday he takes Vatsatvari[5] water of four kinds; it is brought together from the (four) quarters, for food is in (all) the (four) quarters, and water is food: by means of food he thus secures food for himself.

ब्रह्मा, होता, उद्गाता & अध्वर्यु

---

1. The ceremonies treated of in the first six Brāhmaṇas refer to the setting apart of the horse for its sacred office, a year before the sacrifice, and to the intervening period during which the horse is allowed to roam about, though under careful supervision.

3. Viz. from the ghee used for greasing the four dishes of cooked rice.

4[2] That is the Aśvamedha, and thus the immolation (or emptying out) of his own self, so to speak.

CC-0. Prof. Satya Vrat Shastri Collection.

Second Brahmana

Digitized by Sarayu Trust Foundation and eGangotri

1. Now, unsuccessful in the sacrifice, assuredly, is what is performed without a formula (यजुः). (with Vāja. S. 22-2) 'This rope did they take (इमामगृभ्णन्रशनामृतस्य) at the first age of the truth (ऋत, sacrifice), it has been with us at this Soma-sacrifice, declaring the cause in the gaining of the truth (ऋत)', he takes the halter (अभिधानी) of the horse in order to supply a formula for the success of the sacrifice. It (the rope) is 12 cubits long — twelve months make a year & it is the year, the sacrifice', he secures.

2. Concerning this they say: 'Is the rope to be made 12 cubits long or 13 cubits long?' Well, that year is the bull (ऋषभः) among the seasons & the thirteenth (or intercalary) month is an excrescence of the year; and this Aśvamedha is the bull among sacrifices; and in as much as the bull has an excrescence (hump), one may add on a thirteenth cubit to the rope as an excrescence to this (Aśvamedha): even as the bull's hump is attached[2] (to his back), such like would this be.

विष्टपम्

3. He puts the halter on the horse with वाजसनेयि सं० 22.3,8) 'Encompassing[3] than art', therefore the offerer of the Aśvamedha conquers all the quarters; the world than art', the world he thus conquers; 'a ruler than art, an upholder,' — he thus makes him a ruler & upholder; — go than unto Agni Vaiśvānara', he thus makes him go to Agni V. (the friend of all men); 'of wide extent', — he thus causes him to extend in offspring & cattle; — consecrated by स्वाहा (hail!), this is a call[2] for it; good speed to thee for the gods!" — he thus makes it of good speed for the gods; — 'for Prajāpati' — the horse is sacred to Prajāpati: he thus supplies it with his own deity.

स्वगा in V.S. 22.4 is डाजन्त, an indeclinable. It means स्वयंगामिन्.

---

1. Or possibly, it is for the space of a year that he secures the sacrifice.
2. Lit. spread out.
3. or perhaps encompassed, encircled (अभिधा, अभिधा-तव्य — Uvata. to be named or praised — महीधर.)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

3² 'वषट्' is the sacrificial call uttered by the होतृ at the end of the 'याज्या' or offering-verse of a regular oblation (आहुति) as distinguished from minor libations such as होमs and आघारs, which require no 'याज्या', & for which the sacrificial call, marking the pouring out of the libation into the fire — is 'स्वाहा'.

3. Supplies it with his own deity. Or perhaps, he causes it to succeed by means, or with the help, of its own deity (i.e. प्रजापति).

Third Brahmaṇa

1 Even as some of the havis may be spilled before it is offered (हविष इत्यवयवे षष्ठी) (स्कन्देत् may fall down), so also (part) of the victim is here spilled in that they let loose the sprinkled (निक्त from णिजिर् शौचपोषणयोः, जुहोत्यादि — क्त) before it is slain. When he offers the स्तोकीयाs (oblations of drops), he offers that (horse) as a complete offering — so as to make good any spilling (अस्कन्दाय), i.e. to neutralize any spilling that may have taken place.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

ब्राह्मणस्य ऋत्विग्भ्यो देयप्रोदनो ब्रह्मौदनः। ब्रह्मौदनः स्तोकीयाः स्तोकानां प्रस्रवणबिन्दूनां निरूक्तप्रणालया सम्पादितस्य रज्जुतीः।
स्वहस्तं जुहोति — अग्नये स्वाहेत्येता दश आहुतीः शतकृत्वश्चावर्ता जुहोति।
प्रदक्षोदिति — प्रदक्षोदिति प्राप्ते तोसुन आदिलोपः, इकारस्य चत्वम्।
अनुकृत्य — आनुपूर्व्येणोच्चार्य।
वैश्वम् — प्रकर्षेणाग्निर्व्याप्नोति यस्मिन् ऐच्छन्।
अतीः — इह रतिरिह रमता मित्येता आहुतीः।
नष्टैवः — नष्टमग्निश्चरति गवेषयते इति।
अग्निचौ — अग्नित्रयोः पुनौ।
तल्पयाः — तल्पसाधवः।
बन्धनम् — बध्यतेऽस्मिन्निति बन्धनस्थानम्।
उद्दृंहम् — समाप्तिम्।
आत्मा — शरीरम्।
सप्तभिः — चक्षुरादिभिश्छिद्रैः।
आवृतः — वसुरुद्रादित्यात्मकैस्त्रयस्त्रिंशद्गुणा देवाः लोका अपि त्रिगुणाः समस्ताः प्रत्येकं त्रादिमध्यान्तनिर्माणेन आवृतः।
प्रजापतिरश्वमेधमसृजत। स सृष्टः ----
यज्ञरात्मकं निरूढवन्तम्।
प्रऽचमत्कीनात् प्रसाम — स एव रुद्रः सम्यङ्मा मपूर्वणां बहुत्वाद् बलवन्तरं इति कृत्वा ऋचमश्वमेधं साम सामयज्ञं च प्रऽचमत्कीनात् क्रीणतेः प्रावर्णोत् अवस्थ संकोचितवान्। weighed down — Eggeling
वैश्वदेवानि उदयच्छन् — अपक्रामन्ति वैश्वदेवानि होमकर्माणि उन्मान स्थानीयानि (removing the pegs) अथवा उदयच्छन् उत्क्षिप्तवन्तः (threw up, placed =).

द्वितीये ब्राह्मणे — अश्वमेधे ऽन्वायत्ताः Concerned in ---. अन्वायत्ता इयति concerned (alleged) to take a concern in the thing. अग्नयेऽश्वस्य मेदस्यो वपामवद्यति plunges (a dead body) or flanks from the front of the thigh bone. after sprinkling of the thigh bone.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

ब्राह्मणस्य ऋत्विग्भ्यो देयप्रोदनो ब्रह्मौदनः। निधनी-

स्तोकीयाः स्तोकानां प्रस्तवणबिन्दूनां निष्क्रयणात्मा सर्वस्वित्वम्

दाहुतीः।

सहस्रं जुहोति — अग्नये स्वाहेत्येता दशाहुतीः शतकृत्वश्चावृता जुहोति।

प्रदक्षोदिति — प्रदक्षोदिति प्राते तोसून आदित्योऽः, इकारस्य चत्वम्।

अनुकृत्य — आनुपूर्व्येणोच्चार्य।

वैश्वम् — प्रकर्षेणान्तिकान्निधेः रेच्छन्।

अतीः — इह रतिरिह रमता मित्येता आहुतीः।

नक्षैवः — नक्षमन्विच्छति गवेषयते इति।

अग्निचौ — अग्नित्रयोः पुनौ।

तल्पाः — तल्पस्थानः।

बन्धनम् — बध्यतेऽस्मिन्निति बन्धनस्थानम्।

उद्धनम् — समाधिम्।

आत्मा — शरीरम्।

सप्तधा — सप्तभिः शीर्षण्यादिभिश्छिद्रैः।

आवृतः — वसुरुद्रादित्यात्मकैरयमेवास्त्रिगुणा देवाः। लोका अपि त्रिगुणाः समस्ताः प्रत्येकं चादिमध्यान्त-निर्माणेन आवृतः।

प्रजापतिरश्वमेधमसृजत। ससृक्षः ----

यज्ञरात्मकं विग्रहवन्तम्।

प्रऽर्चमल्लीनात् प्रसाम — सएव रुद्रः सन्नपि। मधुवर्णां बहुत्वाद् बलवत्तर इति कृत्वा सत्तमश्वमेधं साम सामयज्ञं च प्रऽर्चमल्लीनात् ल्लीकरणे प्रावणोत् अवरुद्धस्य संकोचितवान्। weighed down — Engg. term

वैश्वदेवानि उदयच्छन् — अयक्षामन्नि वैश्वदेवानि होमकर्माणि उन्मथनस्थानीयानि (churning pole) सन्ति उदयच्छन् उत्क्षिप्तवन्ति (threw up, flashed).

द्वितीये ब्राह्मणे ——— अश्वमेधे ऽवीयन्तः Concerned in ---. अवनाया इयति comes (alleged) to Rudra a concern in the Horse. अधस्पदमश्वस्योत्पवयति plunges (a deed ---) or floats under the feet of the Horse after the sprinkling of the Horse has been done.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

वज्रेणैनमवक्रामति — stamps down with the thunderbolt.

पाप्मा भ्रातृव्यः, the wicked enemy. नैनमाप्नोति does not get hold of him.

आर्तिमार्छति — incurs injury.

ईश्वरो वा एष आर्तिमार्तोः (तोसुन्प्रत्यय) is liable to incur injury.

अवरुन्धे — secures, वशे कुरुते।

परो मर्तः परः श्वः — is the last part of the यजुः (22.5) परः = पराभूतः, पराकृतः.

यो अर्वन्तं जिघांसति तमभ्यमीति (=हिनस्ति) वरुणः परो मर्तः परः श्वा — V.S. श्वरुवेणाश्वहन्तेव पराकृत इत्यर्थः — महीधर.

तृतीये ब्राह्मणे

परिमितमवरुन्धीत, would gain something limited. संस्थापयामि = establish myself.

~~परी~~ पराचीर्जुहोति offers them straight away.

पुनरावर्तते — turns back again, i.e. by commencing the ten oblations again from the beginning.

अनाहुतिर्वै रूपाणि नैता होतव्या, the forms are no offerings, they should not be offered.

बहिर्धा एतमायतनात्करोति one (the priest) puts the sacrificer out of his resting place.

यज्ञमुखे यज्ञमुखे, at each opening of sacrifice.

एकमतिरिक्तम्, one additional offering, i.e. the 49th.

अर्धुकः is apt to thrive.

चतुर्थे ब्राह्मणे

असृजत्, poured forth the life-sap of the horse. सृष्टः = भ्रष्टः। पराङ् = पराङ्मुखः, straight away.

इष्टिभिः, i.e. सावित्रीभिः dedicated to the god सवितृ. V.S. 22.9. (तत्सवितुर्वरेण्यम्) & the following 5 R.M.

अनपायुञ्जत् = followed it up.

Digitized by Sarayu Trust Foundation and eGangotri

ब्राह्मणस्य ऋत्विग्भ्यो देयप्रोक्तो ब्रह्मौदनः।

स्तोकीया: स्तोकानां प्रस्तवणबिन्दूनां निवपणतया सम्बन्धिन्यः आहुतीः।

सहस्रं जुहोति — अग्नये स्वाहेत्येता दशाहुतीः शतकृत्वआवृत्ता जुहोति।

प्रयोदिति — प्रयोदिति प्राप्ते लोपागम आदिलोपः, हकारस्य चत्वम्।

अनुकृत्य — आनुपूर्व्येणोच्चार्य।

वैश्वम् — प्रकर्षेणाग्निभाग्निभ्यां ऐच्छन्।

आहुतीः — इह रतिरिह रमणमित्येता आहुतीः।

नवैवः — नवमन्विच्छति गवेषयते इति।

अग्निभ्यौ — अग्नियोः पुत्रौ।

तल्पयाः — तल्पसाधनः।

बन्धनम् — बध्यतेऽस्मिन्निति बन्धनस्थानम्।

उदुचम् — समाप्तिम्।

आत्मा = शरीरम्।

सप्तधा — सप्तभिः अक्ष्यादिभिश्छिद्रैः।

आवृतः — वसुरुद्रादित्यात्मकैरवयवैस्त्रिगुणा देवाः। लोका अपि त्रिगुणाः समस्ताः प्रत्येकं आदित्यचान्त-र्निमग्नेन आवृतः।

प्रजापतिरश्वमेधमसृजत। ससृष्टः ----

यज्ञरूपकं विग्रहवन्तम्।

प्रऽर्चमलीनात् प्रसाम — सएव रुद्रः सम्बन्धा-मपूर्वाणां बहुत्वाद् बलवानरिति कृत्वा सत्रमश्वमेधं साम सामयज्ञवं च प्रऽर्चलीनात् लीनरूपे आवर्णात् अवरुद्ध संकोचितवान्। weighed down — Egge-ling

वैश्वदेवानि उदयच्छन् — अयतामनि वैश्वदेवानि होमकर्माणि उत्तमन स्थानीयानि (sacrificial fires) अथवा उदयच्छन् उत्क्षिप्तवन्ति (threw up, flashed).

द्वितीये ब्राह्मणे ——— प्रश्वमेधे ऽवीयमानाः Concerned in ---. अन्यायो नयति causes (alleges) to take a concern in the horse. अधस्पदमश्वस्योत्प्लवयति plunges (a deep pool) or floats under the feet of the horse after the sprinkling of the horse has been done.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम Shri Satya Vrat Shastri

पता 59, Ist Hostel,

डाकखाना Banaras Hindu University,

ज़िला Banaras (U.P.)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

प्रहियापुरतः
१३।८।५४

प्रिय सत्यायुष्मानेधि,

अधिगतस्ते लेखोऽवगतश्चो-
-दन्तः। अविकलामद्यावधि प्राप्यां वृत्तिम्प्राप इति परो
मे परितोषः। धन्यास्ते सखायो येन ते सहायतामयुः।
शोच्यश्च स तपस्वी योऽकारणं विरोधमचारीत्।
स्वे कर्मणि निरन्तरं व्यापृतो श्रान्तं च श्राम्यन्मा स्मे
शरीर उदासितो भूः। इदं हि सत्तमं साधनं सिद्धीनां
भृशं चोपकारकमायतेः। अयं ते मातुः कामो वारा-
णस्याः परापतंस्त्वं महार्हां कौशेयीं शाटीमाहरेः।
इमां च सा जेम्पुर द्वितीयामिच्छति। क्रये लवपुरीया
आर्हताः सहायभावं नेया मा कश्चित्क्रयविक्रयी

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयत:
२३।३।५४

प्रिय सत्यायुष्मानेधि।

अद्य चिरं ते कुशलो-
दन्तस्य सम्प्राप्तस्य। कच्चित्स्वस्थोसि शरीरे।
यत्त्वं क्वचित्पत्रे लेखी: शीर्षवेदना मेऽस्तीति शिरो-
भ्रान्तिर्वा मे जायत इति तत्परामृशतोरावयोर्मन:
सव्यथमास्ते। कथय कीदृशीदानीं ते शरीरसम-
वस्थेति। कर्हि विश्वविद्यालयो नैदाघस्यानध्यायस्य
कृते संवरीता (कर्मणि लुट्), कर्हि च वाराणसीत: प्र
तिष्ठाससे। संवृते विश्वविद्यालये वाराणस्यां स्थि-
त्या नार्थ:, निदाघप्रसरदोषाश्च प्रचुरा भवन्तीति
मन्येऽप्रेलमासारम्भ एव तत: प्रस्थानीयं यदि
डाक्टरमहोदयो न विरुन्धे। अहं त्वप्रेलमासोप-

CC-0. Prof. Satya Vrat Shastri Collection.

क्रम एव होश्यारपुरं प्रति प्रस्था-
-स्ये। तत्रोपसर्गार्थचन्द्रिकायाः
कृते जर्मनकोषान्मे बहुसंग्राह्य-
मस्तीति। यदीच्छसि त्वमपि
तत्रैव मया समं पादोनं मास-
मवतिष्ठेथाः स्वमध्ययनं च प्रव-
र्तयेथाः। यथा ते रोचते तथा
करिष्यसीति कामचारस्ते।
पत्रोत्तरं त्वरितं देयमिति
बलवत्प्रेरयन्नहं विरमामि वत्सल-
स्ते जनकश्चारुदेवश्शास्त्री।

POST CARD
REPLY
ADDRESS ONLY

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम डा० श्री सत्यव्रत शास्त्री ए.मू. पी.एच.डी.

पता २२ एफ, कोल्हापुर रोड कमला नगर

डाकख़ाना

ज़िला देहली — ६

Delhi — 6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

साध्वाश्रमतः
३१।८।५६

प्रिय सत्यायुष्मानेधि।

श्वोहमितः प्रस्थाय जालन्धरे चतुरहं पश्चाहं वाऽवस्थास्ये यावता वाऽनेहसा भूषा निर्मायिष्यन्ते। परह्योहं भूयो व्याचार्यवरेण समगां त्वामधिकृत्य चावोचम्। अत्रावसरे ततो भवान्निर्भिन्नतरकममायं च स्वमभिप्रायं चाचकथत्। अहमगदिषम् — सत्यो नियतं नियुक्तिं प्रार्थयिष्यते। स आह — बाढं प्रार्थयताम्। अहमप्रक्षम् — किन्नु संभावयन्ति भवन्तः सत्यव्रते। स प्रत्याह — वेदे वैदिके व्याकरणे भाषाविज्ञाने च कामपि प्रौढिमध्यापनार्हन्तीं चेति। इदं चागदीत् — उपकुलपतयस्तावत् पेरस्थे श्रीदेवराजे प्रीतिमन्त इव प्रतीयन्ते यस्मात्तैः कदाचिदहं तद्विषयां मे मतिं पृष्टः। अहं प्रत्यवोचं पेरस्थः सुजनस्तु नार्वागेष्यतोऽगस्त्यमासात्परापतिष्यतीति तद्विषये विचारणाऽनवसरग्रस्ता। तेनोक्तं यद्येवं तर्हि करिष्यते यत्न इति। प्राच्यविद्यालये नियुक्तयो[illegible] इति भाति। यद्यपि नाद्यावधि तद्विषया विज्ञापनावार्तापत्रेषु प्राकाश्यं गता। अस्तु। अस्माभिः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

हैयङ्गवीनमहरहर्जुषस्व। वातामानि च कानिचि-
द्येन दौर्बल्यमपेयात्। [illegible]
गन्तास्मीति विनिवेद्य विरमाम्यहं ते तातश्च
चारुदेवश्शोभी॥

साध्वाश्रमतः
तृतीये नवाम्बरमास-
स्य वासरे।

प्रिय सत्यायुष्मानेधि।

अहियापुरस्थे ग्रन्थसङ्ग्रहे विचार्यं
विचार्यमपि श्रीपत्रिकायां श्रीविद्यानिधिप्रणीतो वेदे लङ्कृतय इति
विषयको निबन्धः प्रस्मृताभिधानेन दाक्षिणात्येन कृतः कादम्बर्यो
गद्ये पद्यखण्डानीति विषय विशेषमुपन्यस्यँल्लेखश्च नोपलब्ध
इति खेदः। मत्कृतिरनुवादपुस्तकं तु कथंचिदाप्तमिति तत्
सोमवासरे प्रहेतास्मि। इह विश्वविद्यालये नियोगमिच्छतां
प्रार्थनापत्राणि नाद्यापि प्राप्तान्याचार्यैः। कदा जालन्धरा-
-दिह संक्रमिष्यति विद्यालय इति नाद्धा वेद कश्चित्।
आचार्या अपि तव व्यक्तं नो [illegible]न्ति किञ्चित्।

CC-0. Prof. Satya Vrat Shastri Collection.

नूत्नान्यागाराणि तु निर्मीयन्ते,
अष्टौ चाऽऽ मासान्तमुपयोगार्हाणि
भविष्यन्ति, शिष्टानि च मासद्वयेन
मासत्रयेण वा परिनिष्ठितनिर्मितीनि
भविष्यन्तीति प्रत्येत्यधिकृतो जनः।
त्वदीयं प्रार्थनापत्रं सोलनकार्यालये कदा
प्राप्तं, केन च प्राप्तमिति त्वया देहलीत्या
डाक्नियोगिनः प्रार्थ्याः प्रेरणीया श्च
त्वरितमन्विष्यतामिति, जिज्ञासा च मे
शाम्यतामिति। इदानीं किमवस्थं ते शरीरम्
व्यायामो हि रुजामेकं चिकित्सितमिति क्रिया-
समभिहारेण त्वां स्मारयामि। आगरा विनिर्मितं

पोस्ट कार्ड
[illegible] KUBER HADIU LEEHA
[illegible] BY THE LAE [illegible] ITAL
[illegible] WORKING DAY OF [illegible]

नाम Dr. Satya Vrat Shastri
M.A., M.O.L., Ph.D.
पता 23 F, Kotlapur Road,
Kamala Nagar,
Delhi-6
डाकखाना

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
भाद्रस्य पञ्चमेऽहनि

प्रिय सत्यायुष्मानेधि ।

लेखं तेऽनुवाच्य किञ्चित्क्षुभित-
मना अस्मि संवृत्तः । इदं च व्यक्ततरकं जिज्ञासे किम-
द्विग्नोस्यभ्युपेतार्थकृत्यायाः । किं मन्यसे दुःसम्पादेयं किया
वत्सरद्वितयेनापीति । यद्येवं किं नाम शक्यपरिवर्तोऽन-
सन्धेयविषय उत न । यदि पूर्वः पक्षस्त्वरितं परिवर्त्य-
तामेषः । यद्युत्तरः, किं राजकीये क्वचित्कालेजे नियुक्तिं
कामयस उताहो अन्यत्रापि यत्रेयं सुलभा स्यात् । यदि
गान्धिकालेजे कञ्चित्कालमौपाध्यायकं लभ्येत तदा किं
मया तत्रार्थे प्रयतनीयम् । साधीयश्चिन्त्यताम् । द्विप्रकारि-
ता नौपमिकी । अविवेकः परमापदां पदमिति प्रत्यक्ष-
मन्वभूम । महान्द्रव्यराशिः समयश्चाप्यनर्घः परप्रतारि-
तानां नो व्यर्थं गतो भूत् । तथा क्रमितव्यं यथा भूयो हासा-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD
REPLY
ADDRESS ONLY

Shri Satya Vrata Shastri
M.A.
C/o
Arya Samaj,
Bada Nala,
Banaras C.
(U.P.)

CC-0. Prof. Satya Vrat Shastri Collection.

अहियापुरतः
भाद्रस्य पञ्चमेहनि

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्यायुष्मानेधि ।

लेखं तेऽनुवाच्य किञ्चित्क्षुभित-
मना अस्मि संवृत्तः । इदं च व्यक्ततरकं जिज्ञासे किम-
द्विग्नोस्यभ्युपेतार्थकृत्यायाः । किं मन्यसे दुःसम्पादेयं क्रिया
वत्सरद्वितयेनापीति । यद्येवं किं नाम शक्यपरिवर्तोऽन-
सन्धेयविषय उत न । यदि पूर्वः पक्षस्त्वरितं परिवर्त्य-
तामेषः । यद्युत्तरः, किं राजकीये क्वचित्कालेजे नियुक्तिं
कामयस उताहो अन्यत्रापि यत्रेयं सुलभा स्यात् । यदि
गान्धिकालेजे कश्चित्कालमौपाध्यायकं लभ्येत तदा किं
मया तत्रार्थे प्रयतनीयम् । साधीयश्चिन्त्यताम् । द्विप्रकारि-
ता नौपयिकी । अविवेकः परमापदां पदमिति प्रत्यक्ष-
मन्वभूम । महाब्दव्यराशिः समयश्चाप्यनर्घः परप्रतारि-
तानां नो व्यर्थं गतो भूत् । तथा क्रमितव्यं यथा भूयो हासा-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD
REPLY
ADDRESS ONLY

Shri Satya Vrata Shastri M.A.
C/o
Arya Samaj,
Bada Naka,
Banaras C.
(U.P.)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम श्री सत्यव्रत शास्त्री एम.ए.

पता पंजाबी मुहल्ला

डाकख़ाना अम्बाला छावनी

ज़िला Ambala Cantt

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

होश्यारपुरतः
१६।४।५४

प्रिय सत्यायुष्मानेधि।

अधिगतं ते पत्रमवगतं च वृत्तम्। प्रियायै ते स्वस्र उषसे नववत्सरप्रक्रमोपायनमिति सप्तकपञ्चकं प्रेषितम्। इतोऽहं विंशेऽहनि मध्याह्ने टाण्डां प्रति प्रस्थाताहे। पं० भीमसेनस्य फ्रेञ्चकोषो गेहे तिष्ठति स च तदर्थमाहर्तव्य इति गृहकुञ्चिकामपेक्षे। तेन त्वरितं पत्रप्राप्तिसमनन्तरं सा प्रेहया यया तामिहस्थो वाप्नुयाम्। एषा च विधा तत्सम्प्रेषणस्य— किञ्चिद् दृढं पत्रखण्डं गत्तेत्याख्यं समादेयम्। तत्राभङ्गुरेण सूत्रेण कुञ्चिका बन्धनीया, सङ्केतश्च मदीयः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD
THE ANNEXED CARD IS INTENDED FOR PREPAID ANSWER

POSTAGE
INDIA
NIGH

Dr. Satya Vrat
Shastri,
3/54, Roop Nagar,
Delhi—6

CC-0. Prof. Satya Vrat Shastri Collection.

वाराणसीतः
२४।३।६१

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्य चिरं जीव्याः,

अद्य पूर्वाह्णे ते पत्रमवापम्। स्थाने त्वया वागीश्वर महाभागा उपदृष्टाः प्रयुक्ताश्च कार्यनिर्वाहणार्थम्। त्वयि स्निग्धास्ते त्वत्कामितं पूरयिष्यन्तीति शक्यं श्रद्धातुम्। अस्तु कृतोत्र यत्न इति परितोषः, स कीदृशं फलं प्रसूत इत्यर्थान्तरं न चिन्तागोचरः। श्रीखजाञ्चीरामः खलु वित्तो नागरकत्वेन नासौ श्रद्धेयः, स्वार्थानुसन्धिपर इति मृदुमधुरवचनः, व्यवहारे तु गरलमुद्वमत्यन्तः सम्भृतम्। एतादृक्षाणां पुस्तिकानां निर्मितौ नात्माऽभ्यासनीयः। विशङ्कटः संस्कृतसाहित्याम्भोधिरवलोडनीयः, तत्त्वरत्नानि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD

केवल पता
ADDRESS ONLY

INDIA
6 nP भारत 6 np

Dr. Satya Vrat Shastri
M.A., Ph.D.
3/54, Roop Nagar
Delhi — 7

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

साध्वाश्रमतः
२१/३/६६

प्रिय सत्य ज्योग्जीव्याः सततं चाभ्युदियाः,

श्वस्तस्य करणीयस्य परमोऽवधिः परिपूरयिता। तत्रार्थे स्वं नियोगं प्रार्थयमानस्त्वं तन्नियोगं नूनं वारयिष्यसीत्यपि महतोऽनिष्टस्य प्रशमनमिति मृग्यं नः। स्वयाऽऽर्द्रन्त्या परीष्टिलब्धवर्णान्प्राश्निकान्स्वेऽनुकूलयिष्यसीति दृढो मे प्रत्ययः। तेन नातः कर्म्मणः प्रमदितव्यं त्वयेति भूयः प्रयुज्यसे। यत्सर्पिस्त्वया प्रहितं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

विचार्यते — किं दिवा तावुपगायेता-
माहोस्विन्नन्तमिति । ब्राह्मणो दिवा
रजस्वलानन्तमिति च व्यवस्थितम् ।
ब्राह्मणश्च यजमानो राजा तेन तेन
प्रदीनायजत, तत्तदर्थात् इत्यादि स्तोत-
व्यम्, क्षत्रियेण च तं तमनिवेदितं
सम्प्राहुरत तं तमजयदिति शंसनीयम्
इत्यादि विस्तरशो निगदितम् । इदं च जाने
तत्रैवाधिकमुक्तं बलवता गृहिणाऽ
श्वमेधेन यष्टव्यं न जात्यबलेन ।
प्रवेमि सम्प्रतं ते न बहुगर्भं भविष्यति ।
शिशुर्नः सम्प्रति प्रकृतिस्थेति प्रियं नः स्वे
शर्मन्ऽवहिततरः स्या इति प्रयुक्तः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

पोस्ट कार्ड

साथ का कार्ड जवाब के लिए

केवल पता

5 NP INDIA 5 नपै

Dr. Satya Vrat Shastri
M.A., Ph.D.
4, Rajmahal,
Kurukshetra
(Dist. Karnal)

देहलीतः
१२।५।५८

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्य,

अद्य प्राह्णे पत्रं प्रैरिरं विवरणमकालहीनम् (अनुपदमेव) प्रहेष्यामीति जिज्ञापयिष्यन्। अपराह्णे च यथाऽऽश्रुतं विवरणं प्राहायि। तथापि तत्र परितोषो नावृतत्। शङ्के न्यस्ते प्येकदेशस्य भाषान्तरे धृतेषु चापि प्रायेणासंस्तुतेषु पदेषु विशदेषु टिप्पणेषु, क्वचित्ते गतिर्व्याहन्येतेति भूयः किमप्युपन्यस्यामि। एकस्मिन्ब्राह्मणे (कतमस्मिन्निति तु न स्मर्यते) द्वौ गाथिनौ (गाथकाविति नव्याः) यजमानमुपवीणयत इति विषय उपात्तः। तत्रेदं मीमांस्यते किं तावुभावपि ब्राह्मणौ स्यातामुत क्षत्रियौ। यदि पूर्वः पक्षः, तर्हि का हानिः, यद्युत्तरस्तदा केति। इदं च विनिगम्यते — तयोरेकतरो ब्राह्मणो भवेदपरः क्षत्रिय इति। तथा सति यो लाभः, स व्यक्तमुदितः। भूयश्च

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



Dr. Satya Vrat Shastri;
M.A., Ph.D.
(of the Kurukshetra
University)
1714/5 Mohalla Chontalla,
Thanesar P.O.
(Dist. Karnal)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

स्वस्ति। होश्यारपुराच्चारुदेवश्शास्त्री कुरुक्षेत्रस्थं पुत्र-
मायुष्मन्तं प्रेयांसं सत्यव्रतं सस्नेहातिरेकं परिष्वज्यान-
दर्शयति तद्यथा — सोलनस्थेन त्वया प्रेरितं पत्र-
मापं वृत्तं च वेदनीयमन्वभूवम्। निरन्तरं धारासारैः
प्रवृष्टेन देवेनोद्वेजितस्त्वं पार्वतं प्रदेशमजहा इति न
साध्वाचरः। कुरुक्षेत्रे य ऊष्मा यश्च वर्षविगमे
ऽन्तरे घर्मः स कां क्लान्तिं करोति कां च कार्यापहृतिं
जनयतीति न ते त्वरान्वितस्य चिन्तागोचरोऽभूत्।
अस्तु। अद्य मध्याह्ने देहलीस्थाद् विश्वविद्यालयाद्
रजिष्ट्रीकृतं त्वदुद्देश्यकं पत्रमिह मां द्वारीकृत्य प्रापत्।
तन्मया कुरुक्षेत्रे विश्वविद्यालयस्थेन त्वया प्राप्यमिति
पूर्वं सङ्केतपरिवृत्तिपूर्वं परावर्ति। दैवाद् गृहाङ्गं ते तदानीं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

स्वस्ति। होश्यारपुराच्चारुदेवश्शास्त्री कुरुक्षेत्रस्थं पुत्र-
मायुष्मन्तं प्रेयांसं सत्यव्रतं सस्नेहातिरेकं परिष्वज्यान-
दर्शयति तद्यथा — सोलनस्थेन त्वया प्रेरितं पत्र-
मापं वृत्तं च वेदनीयमन्वभूवम्। निरन्तरं धारासारैः
प्रवृष्टेन देवेनोद्वेजितस्त्वं पार्वतं प्रदेशमजहा इति न
साध्वाचरः। कुरुक्षेत्रे य ऊष्मा यश्च वर्षविगमे
ऽन्तरे घर्मः स कां क्लान्तिं करोति कां च कार्यापहृतिं
जनयतीति न ते त्वरान्वितस्य चिन्तागोचरोऽभूत्।
अस्तु। अद्य मध्याह्ने देहलीस्थाद् विश्वविद्यालयाद्
रजिष्ट्रीकृतं त्वदुद्देश्यकं पत्रमिह मां द्वारीकृत्य प्रापत्।
तन्मया कुरुक्षेत्रविश्वविद्यालयस्थेन त्वया प्राप्यमिति
पूर्वं सङ्केतपरिवृत्तिपूर्वं [illegible] दैवाद् गृहाङ्कं ते तदानीं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड
केवल पंक्ति

POSTAGE
5 NP
INDIA

Dr. Satya Vrat Shastri;
M.A., Ph.D.
(of the Kurukshetra University)
1714/5 Mohalla Chantalla,
Thanesar P.O.
(Distt. Karnal)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

देहलीतः
२२।४।५८

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्य ज्योऽजीव्या नित्यं चाभ्युदियाः।

अद्य ते तृतीयं पत्रमापम्। अवाप्तचरस्य पत्रद्वितयस्य प्रतिवचस्तु मनाङ् मन्दायमान इवोनविंशेहनि विन्यास्यम्, पत्रं तु तत्र वासरे नापपारं प्रहेतुम्। तेनातिक्रान्तवेलं तल्लब्धवतस्ते कश्चिदुद्वेगोऽभूत्परिहार्यः। उषास्तु प्रागेव तृतीयपत्रलब्धेरिह ह्यो नक्तं सुखं गृहानुपायान्नो विस्मयाय। अस्तु सर्वं निर्विघ्नं निर्वृत्तमिति निर्वृतं नश्चेतः। द्रव्यूनवृत्तपत्रे संनिवेशाय

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

POSTAGE 5 NP. INDIA

DELY 23.4.58

Dr. Satya Vrat Shastri
M.A., Ph.D.
Qr. Quarter No. 4
Raj Mahal,
Kurukshetra P.O.
(Dist. Karnal)

CC-0. Prof. Satya Vrat Shastri Collection.

अद्य सोमवासरेऽपराह्णे श्रीप्रद्युम्नो नो गृहानुपागा-
त्सामग्री समेत [illegible]
वेद्यशेषं विद्धि।

देहलीतः
१९।४।५८-

प्रिय सत्यायुष्मानेधि।

दलद्वितयं ते यथाकाल-
मासादयम्। प्रिया नः शिशुरद्यापि ज्वराक्रान्तेति
मात्मानं चिन्तायै स्म दाः। त्रिचतुरान्वासरानेत-
ल्लक्षणो ज्वरो वतिष्ठत इति वृद्धाः। मन्ये यावदिदं मे
पत्रं त्वदन्तिकं याति तावदपेतः स ज्वरः स्यात्।
पुराणसचिवालये लब्धवृत्तिको सौ टाईप कलाकोविद-
स्तु नाद्याप्यस्मानुपागात्समं कृतेन कार्यकलापेनेति
~~ज्योक्~~ स्राक् स्मार्यः। देहली विश्वविद्यालयाभिसम्बद्धात्
पुस्तकालयाद्य [illegible] येन स्मारिता वयं

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

होश्यारपुरतः
१८।७।५९

प्रिय सत्यायुष्मानेधि ।

अद्य मध्याह्ने ते पत्रं वित्त्वा निर्वृत्तिं कामप्यापम् । स्थाने त्वमिह मासस्यास्यैकविंशे हनि सायमुपैतासि । परमुषा स्त्वया समं नायास्यतीति कुतो ध्यवसितम् । कुरुक्षेत्रात्प्रयाता त्वया शयनीयं न समानेयम् । इह तत्रोपयोज्यं विपुलं वासोस्ति । अद्यावधि तु देहलीतो नियुक्तिपत्रं नोपनतम् । सोमवासरे चेदुपनंस्यति स्वस्मिन्रक्षिष्यामि यावत्तवागमम् । यथा ते कामस्तथा डा० सूर्यकान्ताय संस्कृतेन निबद्धं [illegible] । मन्ये तदुत्तरमेक-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड
POST CARD
जवाबी
REPLY
केवल पता
ADDRESS ONLY

Dr. Satya Vrat Shastri,
M.A., Ph.D.
3/54, Roop Nagar,
Delhi — 6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

वाराणसीतः
२४।९।६०

प्रिय सत्य,

जराविक्लवगात्रौ नैकविधव्याध्युपसृष्टौ ते मातरपितरावावामद्यापराह्णे पुण्यायतनं वाराणसीमुपपन्नौ क्षेमेणेति स्वस्थेन चेतसा स्थेयं त्वया चोषसा चेति विनिवेदयति ते

तातश्चारुदेवश्शास्त्री

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

वाराणसीतः
२४।८।६०

प्रिय सत्य,

जराविक्लवगात्रौ नैकविधव्याध्युपसृष्टौ ते मातरपितरावावामद्यापराह्णे पुण्यायतनं वाराणसीमुपपन्नौ क्षेमेणेति स्वस्थेन चेतसा स्थेयं त्वया चोषसा चेति विनिवेदयति ते

तातश्चारुदेवश्शास्त्री

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड
POST CARD
जवाबी
REPLY
केवल पता
ADDRESS ONLY

Dr. Satya Vrat Shastri,
M.A., Ph.D.
3/54, Roop Nagar,
Delhi — 6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust. Foundation and eGangotri



Dr. Satya Vrat Shastri,
M.A., Ph.D.
Mohalla Chauteka,
Thanesar P.O.
Dist. Karnal

CC-0. Prof. Satya Vrat Shastri Collection.

होश्यारपुरतः

Digitized by Sarayu Trust Foundation and eGangotri

१४।८।५८

प्रिय सत्यायुष्मानेधि।

इतो विसर्जनस्य देहल्यां च स्वे नियोगे सन्निधेरन्तरालं यः समयः स विशेषेण भाषाविज्ञानपुस्तकचर्चने वेदविलोकने वा विनियोज्यः। गुणे महाशयप्रणीतमेव पुस्तकं तत्र भाषाविज्ञाने प्रशंसन्ति तज्ज्ञाः। यानि च सूक्तानि देहलीस्थैः पाठ्यानि सविमर्शानि तान्यपि निपुणं शब्दतोऽर्थतश्च विवेच्यानि। तत्तच्छब्दगतं व्याकरणं सौवरं व्याख्यानं पदपाठादिप्रक्रिया च साधीयः [illegible]। सर्वथा सन्नहनीयं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Dr. Satya Vrat Shastri
M.A., Ph.D.
Mohalla Chantalla,
Thanesar P.O.
(Dist. Karnal)

CC-0. Prof. Satya Vrat Shastri Collection.

होश्यारपुरतः
२०.८.५९

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्यायुष्मानेधि ।

अद्य चिरं ते वृत्तस्याधिगतस्य । मन्ये कार्यान्तरे गुरुणि व्यासक्तस्त्वं कालं नालब्धाः पत्रलेखनस्य । अवसितं शिक्षासम्मेलनमिति सक्षणस्त्वं सम्प्रतीति कार्यस्त्वया यत्न आत्मनिर्मोक्षे । निर्मुक्तमात्रस्त्वं देहलीमानुहि विश्वविद्यालये स्वं निवेदय, गृहं च किमपि सुखदं सुसंनिवेशं शक्तिनगरे न्तर्वर्तमानं रूपनगरे वाऽगारत्रयात्मकमवक्रीणीष्व । इदं च मनसि कुरुष्व रूपनगरे तथास्थितं तद् गेहं स्याद्यथा

CC-0. Prof. Satya Vrat Shastri Collection.

श्री विश्वबन्धुमुपदृश्य गृहानावति-
ष्ये, तत श्चतुर्विंशेहनि खन्नां प्रति
प्रस्थास्ये महोत्सवे संनिधातुम्।
ततः परापत्य मई मासस्य प्रथमे वासरे
समं तेऽम्बया सहैव संक्षिप्तेनोपकर-
णेन भूयोपि होश्यारपुर मासादयितास्मि।
अपि त्वं खन्नामायियाससि। युदिते
तथा काम स्तदा त्वयि संनिहिते श्रीलोह-
समुद्गकः शयनीयं च सहानेये। अम्बाया-
स्ते सन्त्वाशिषो भूरय इत्युदीर्य विरमति
वत्सलस्तेतातश्चारुदेवश्शास्त्री॥

पोस्ट कार्ड

केवल पता

Dr. Satya Vrat Shastri, M.A., Ph.D.
14 Kalidas Chowtala,
W. Ghaziabad P.O.
(Dist. Karnal)

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

इदानीमेवते ऽपरं पत्रमापम्। यदि तु प्रार्थनाऽभून्महाभारते
राजधर्मान्प्रष्टव्या [illegible]
कश्चिदन्य एव प्रार्थितः स्यात्। श्रीसूर्यभानवे तत्पत्रं
प्रेर्यम्। को दोषः?

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
१५।४।५९

प्रिय सत्यायुष्मानेधि।

पत्रं ते विदमवेदिषं च वृत्तम्।

कार्यो त्राभियोगः। नात्र सिद्धिं सुदुर्लभां पश्यामि। परमस्या
निर्वेशः कश्चिद्देयो भविष्यति। श्रीविश्वबन्धुर्यथा
ऽस्मासु प्रमनायेत तथा घटिष्यते। साध्वाश्रमे ऽ
वस्थाय मया निर्भर्म तस्येष्टः कार्यकलापो यावन्न
विधायिष्यते तावत्कुतस्तस्य दीर्घरोषस्य प्रसत्तिः
संभाव्येत। अचिरादेव तमुपैतास्मि स्वं चार्पयितास्मि।
नात्रावसरे हृदिस्थं कामं निर्वक्तास्मि। त्वदम्बया
कृतसाहचर्य एवाश्रमे वत्स्यामि। कं कालं तत्र
स्थास्यामीति न पारयामि वक्तुम्। द्व्यहाद्वा त्र्यहाद्वा

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

अहियापुरतः
२६।६।५८

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्यायुष्मानेधि,

पत्रं ते धिगतं वृत्तं चावगतम् ।

श्री दयालसिंह न्याससमित्या प्रवर्तयिष्यमाणे देहल्यां सायन्तने विद्यालये यदि सांशयिकाः समिति सदस्या, यदि वा दीवान महाभागा स्तत्र विषये द्यापि न किमपि सम्पादीधरंस्तर्हि मासमेकमिहैवाहियापुरे सुखमुष्यतां सहोषसा सशिशुना त्वया । सर्वमागारमिदानीमस्मास्वधि । अवक्रीतपूर्वी तु गेहान्तरमशिश्रियत् । तेन प्रशान्ते विशाले स्वशाले निराबाधं शक्यावस्थितिरास्थातुम् । मा भूदत्रान्यत्सुखोपकरणं पेयाः स्नानीयाश्च सन्ति सुलभा हिमा आपः । मन्ये सम्प्रति व्यगमत्ते पार्वतान्प्रदेशान्प्रति यियासा । यद्येवं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Dr. Satya Vrat Shastri,
M.A., Ph.D.
3/54, Roop Nagar,
Delhi—6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
११।७।६३

प्रिय सत्यायुष्मानेधि।

पत्रद्वयं ते साकमेवापम्।

अद्य मया श्रीखजानचीरामायार्हताय पत्रं प्रैरि प्राचोदि चासौ महात्माऽवरतः सार्धद्वादशमुद्राः प्रति शतं नो दीयन्तामिति। मुद्रादशकस्योरसीकारो नो निकार एवेत्यपि साधु प्राकाशि। इदमिदानीं द्रष्टव्यमवशिष्यते प्रतिपत्स्यते सौ नोर्थनामुत नेति। अद्यैव मया डा० रघवन्, डा० शुक्लोथ डा० जोषीत्येते महान्तो महनीयाः पुरुषविशेषास्त्वद्रीडरावाप्तिं वेदिता आशीर्भिश्च भूयसीभिस्त्वां वर्धयन्त्विति [illegible]। स्वपत्रे यत्त्वया — 'सूचितो' यत्तेनात्र

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरत:
११।७।६३

प्रिय सत्यायुष्मानेधि। पत्रद्वयं ते साकमेवापम्।
अद्य मया श्रीखजानचीरामायार्हताय पत्रं प्रैरि प्राचोदि
चासौ महात्माऽवरत: सार्धद्वादशमुद्रा: प्रति शतं
नो दीयन्तामिति। मुद्रादशकस्योरसीकारो नो नि-
कार एवेत्यपि साधु प्राकाशि। इदमिदानीं द्रष्टव्यमव-
शिष्यते प्रतिपत्स्यतेसौ नोर्थनामुत नेति। अद्यैव मया डा०
रघवन्, डा० शुक्लोथ डा० जोषीत्येते महान्तो महनीया: पुरुष
विशेषास्त्वद्रीडरावाप्तिं वेदिता आशीर्भिश्च भूयसीभिस्त्वां-
वर्धयन्त्विति च नाथिता:। स्वपत्रे यत्त्वया 'सूचितो' यत्तेनात्र

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



Dr. Satya Vrat Shastri,
M.A., Ph.D.
3/54, Roop Nagar,
Delhi — 6

CC-0. Prof. Satya Vrat Shastri Collection.

गमे ऽकामो ऽस्माकं वा ऽननुमतिः।
तेन सेदानीं यथाकामं कुरुक्षेत्रं
प्रति यस्मिन्कस्मिन्नहनि प्रस्थातुं
कल्पते, न तत्रान्तरायः कश्चिद-
स्ति। स्वसापि ते तच्छ्वशुरेण ना-
न्वज्ञायि गमनाय, तस्मात्सा
वत्सल्यामेवास्ते। अस्मद्विषये न
कापि चिन्ता कार्या। इह सर्वं सु-
ष्ठ्यम्। मान्याय मे सुहृदे श्रीसाधु-
रामाय वाच्यो मे प्रणामपर्यायः।
वत्सलस्ते तातश्च [illegible]॥

पोस्टकार्ड
जवाबी
वस्तुपुता
13.11.

Dr. Satya Vrat Shastri
M.A., Ph.D.
4, Raj Mahal
18, Shivaji Street,
Hyderabad
कुरुक्षेत्र Karol Bag,
KURUKSHERA

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
१०।११।५८

प्रिय सत्य ज्योऽजीव्या नित्यं चाभ्युदियाः।

अद्य मध्याह्ने लेखस्ते ध्यगामि वृत्तं चावागामि। त्वदसन्निधौ विश्वविद्यालयेऽध्यापनकृत्या न साधु निर्वर्त्स्यतीति यदुपकुलपतिराह तन्नाम तेभ्यर्हणामभ्युच्चिनोति, यद्यपीप्सितं ते विदेशगमनं विहन्ति। इदमेव श्रेयसे भूयसे भाति यद्भविष्यति वत्सरे विदेशं याया इति। अम्बा तेऽहं च द्योऽहियापुरमासीषदाव इयास्तु मातापित्रोः संनीडेऽस्यात्। तत्रैवंविधे समाचारे शिशोर्नः सद्यो ति-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
२१।११।५८

प्रिय सत्यायुष्मानेधि।

पूर्वतरेद्युर्वृत्तं ते समुपलभ्य किमप्यामनस्यं मेऽभूत्। विषमस्थस्त्वमिति कुतो मे समस्थता। अप्रतिविधेये विधातरि किं नु शक्यं मानुष्यकेण प्रतिपत्तुम्। इदमेव भूयो भूयो नुशास्मि त्वाऽनादृत्य परकृतपरिवादं स्वकार्यतात्पर्यमेव परं जानीहीति। अम्बा तेऽद्यत्वे परं शरीरसादं धत्ते ज्वरति च। विधिवदुपचरिता सा मन्येऽचिरेणैव कल्यतामासादयिष्यति, नात्र चिन्ताविधेयं विधेयं मनः।

CC-0. Prof. Satya Vrat Shastri Collection.

एष द्वितीयवत्सरावतरस्ते कुरुक्षेत्रे विधिमनुत्सृज्य

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

साथ का कार्ड जवाब के लिए

केवल पता

POSTAGE 5 NP INDIA

Dr. Satya Vrat Shastri
M.A., Ph.D.
4, Rajmahal,
Kurukshetra P.O.
(Dist. Karnal)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
१६।१२।५८

प्रिय सत्यायुष्मानेधि।

इदानीं द्वादश्यां होरायां पत्रं ते मेर्पितं पत्रहारेण, तेन एक्स्प्रेसडिलिवरीत्यर्थेनातिरिक्तेन व्ययेनार्थः। कुरुक्षेत्रं प्रति प्रेरितानां पत्राणामपि नान्यादृशी गतिः। विंशे वासरे सायाह्ने त्वमिहागन्तासीति प्रियं मे। परं नाहमहियापुरे तत्रानेहसि वर्त्स्यामि। अमृतसरसे प्रान्तीये संस्कृतसम्मेलने मया ध्यक्षपदमध्यासनीयमिति विंशे हनि प्रातरेव तत्र संनिधाताहे। क्रिस्मसनिमित्तकेष्वनध्यायदिवसेषु यदि ते

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

महियापुरतः
१३।१२।५८

प्रिय सत्यायुष्मानेधि।

पूर्वतरेहनि पत्रं तवाधिगम्य विषादसध्रीचीनं हर्षमन्वभूवम्। त्वमिह मासस्यास्यैकान्नविंशे वासरे संनिधातास इति किमपि प्राहृषम्, गुरुचरणास्ते सम्प्रति बलवदस्वस्थशरीरा इति भूयो व्यषीदम्। अकालहीनं कल्यतामाकलयेयुस्ते महान्त इति भगवति विधातरि सम्प्रार्थना। विरला हि जगति तादृशाः सौजन्यनिधयो विद्वच्छिखामणयः। त्वयि तु सुतरां प्रीतिमन्त इति युज्यते ते वैक्लव्यम्। इदं च साध्वचारीयदप्रयुक्त एव तैः शतं मुद्रा

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
षष्ठे दिशाम्बरस्य
वासरे।

प्रिय सत्यायुष्मानेधि!

अद्य चिरं ते लेखं प्रतिपालयमानस्य मे। अदभ्रा च चिन्ता ग्रसत इव नौ। किङ्कृतोयं तूष्णीम्भावः। अपि कल्योसि कल्याण? किमिदं कृत्यप्राचुर्यं यल्लेखं प्रत्यवेधीत्। कथय कीदृशस्ते कार्यक्रमः। किं कालादिविषयाणां कश्चिदन्यतमः परिसमाप्तानुसन्धिरुपसमाहितग्रन्थान्तरगतसन्दर्भो वेदानीं समस्ति। हरिमतसंवादीनि तन्मतविसंवादीनि वान्यदीयानि वाक्यानि यथास्थानमुपन्यसनीयानि, तत्तदर्थश्च संग्रहेण

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

जालन्धरतः
आश्विनस्य सङ्क्रान्तौ

प्रिय सत्यायुष्मानेधि।

अहियापुरस्थेन मया ते पत्रद्वितयमवापि वृत्तं च वेदनीयमवागामि। आश्चर्यं खेदश्च मेऽनल्पो भूयदाऽजानां वाराणसेय आर्यसमाजे डाक व्यवस्थाऽलमुद्वेगकरीति। अत एवाहियापुरतो जालन्धरतश्च सम्प्रेषितानां मे पत्राणामेकतमदपि त्वया नोपालम्भीति। अत एव येन क्रमेणाहं श्रीगान्धिकालेज औपाध्यायकमभ्युपागां तं लेशतोऽपि न वेत्थ। बह्वत्र मया चिन्तितम्। मन्ये साधुरेषोऽध्यवसायः। वाराणस्यां त्वत्स्थितौ सम्प्रति वीतश्चिन्तोऽस्मि। यावदिच्छसि तावत् तिष्ठ। अनुद्विग्नेनैकसर्गेण च चेतसा शास्त्राणि शीलय। यदा चाजिगमिषिष्यसि, मद्वशेऽयं नियोग इति ते प्रत्यर्पयिष्यामि। अद्य तं प्रार्थनीयं राजस्ट्रीद्वारा राजेस्ट्रार-महाभागमुद्दिश्य प्रेरितम्। ए.म.ए. रोलाङ्काश्च यथास्थानं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

P.S. — I hope you got the M. Envelope redirected by me.
— C.D.

Shanti Nivas,
Ram Nagar,
Hoshiarpur.
6/6/59.

My dear Satya,

Yours of the 4th instant to hand to-day. I think I wrote to you after I had heard from you from Solan. I was indeed waiting for a letter from you; your mother was every now & then talking of your silence. I am glad you are comfortably accommodated. It is good that Maha with her children is with you. It augurs well for us that L. Suraj Bhan is on the Selection-Committee. L. Mehar Chand, your uncle, is just back from Assam. He had a talk on the phone with Dr. Joshi before he left for Assam. He asked Dr. Joshi if Satya

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

P.S. — I hope you get [illegible]
Envelope redirected by me.
— C.D.

Shanti Nivas,
Ram Nagar,
Hoshiarpur.
6/6/59.

My dear Satya,

Yours of the 4th instant to hand to-day. I think I wrote to you after I had heard from you from Solan. I was indeed waiting for a letter from you; your mother was every now & then talking of your silence. I am glad you are comfortably accommodated. It is good that Moha with her children is with you. It augurs well for us that L. Suraj Bhan is on the Selection-Committee. L. Mehar Chand, your uncle, is just back from Assam. He had a talk on [illegible] with Dr. Joshi before he left for Assam. He asked Dr. Joshi if Satya

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

POSTAGE

5 NP INDIA

Dr. Satya Vrat Shastri
M.A., Ph.D.
Balaram Palace,
Near Jawahar Park,
Solan P.O.
(Himachal)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम Shri Satya Vrata Shastri

पता Shri P. M. Dviveri, C/o

डाकखाना Arya Hostel,

ज़िला Nebali Khabra,

Banaras Ca.

(M. P.)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

केवल पता

नाम Shri Satya Vrata Shastri

पता Shri P. M. Dwivedi, Arya Hostel,

डाकखाना Nebali Khabra,

ज़िला Banaraska (M. P.)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Melkote
15.8.64

Dear Dr. Satyavrat.

Received your letter dated 26.7.64. I could not reply you earlier as I was in Bangalore. 'Jayanthika' is still in manuscript. I am in search of a copy of 'Yadhuvamsha-Charitam' and I shall be sending it as soon as I get it. Did you go through the books I had sent. Kt. May I know your opinion about it. Many of my books are yet in manuscript. It can be printed only through

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

the appreciators works. please write letters to the address given below

Thanking you

Yours Sincerely,

Jagga Alwar Iyengar

2721, IV Cross Road

Malleswaram

Bangalore-3

पोस्ट कार्ड
POST CARD
केवल पता
ADDRESS ONLY

DELHI-6

INDIA

To,

Dr. SATYAVRAT

3/54 ROOP NAGAR

DELHI-6

CC-0. Prof. Satya Vrat Shastri Collection.

9/8862 dt 18.1.57

V. V. R. Institute
P.O. Sadhu Ashram
Hoshiarpur
Jan. 18, '57.

Dear Satya Vrata ji,

Please refer to your letter dated 15th inst.

(i) a. ध्वान्त-त (dhvānta) occurs in RV. X.73.11; 113.7; Taitt. I.7.2; Kāṭh. IX.19; Kauṭhuma I.319; Jaimi. I.33.7; Paipp. XX.52.8 and RV. X.73.3 (the last in Ablative).

b. ध्वान्त-त (dhvānta) occurs in Kāṇva XXXIX.5.1; Maitrā. IV.9.17.

c. ध्वान्त-त (dhvānta occurs) in Mādhya. XXXIX.7.

(The three ध्वान्त-तs may be discriminated by their different accents, first with its last syllable accented, and with its first syllable accented and the third with its first syllable Svarita.)

(ii) The quotation 'anisitam nimini jarbhurāṇaḥ' occurs in the Rv. II.38.8.

P.T.O.

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by Sarayu Trust Foundation and eGangotri

Digitized by Sarayu Trust Foundation and eGangotri

With best wishes,

Yours Sincerely,

Sharminder Kumar
for
Director,
V.V.R. Institute,
Hoshiarpur.

पोस्ट कार्ड
जवाबी
केवल पता

नाम Dr. Satya Vrat

पता 23F, Kamala Nagar,
Sabzi Mandi,

डाकख़ाना DELHI-6

ज़िला

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Bhandarkar Oriental Research Institute
Phone No. 6936

6000/60 G

Prof. Chintaman Shastri,
AHIYAPUR
P.O. Kanpur
Dist. Hoshangabad

Dr. Satya Vrat Shastri, M.A., Ph.D.
Queen Victoria Road,
Calcutta 12.

(Thumbed)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

AHIYAPUR
1/7/59

My dear Satya,

I am in receipt of yours of the 29th ultimo. It is strange that both Pt. Vishnabandhu & L. Jagan Nath are dropped. We know very little of Mr. N.N. Chatterjee of the Osmania University. Pt. Vishnabandhu may like to speak to Prof. D.C. Sharma or not. His presence in the Committee would have been very much helpful. Now much depends upon Dr. Suryakanta. I shall write to him in a few days. We shall be leaving back for Hoshiar Pur on the 3rd of this month. I know from your letter that Usha is leaving for Delhi on the 12th. There is nothing customary about presents on such occasions. There was no festive occasion calling for a gift of the kind you have in mind. And Solan is no place for the purchase of a Sari or Saris or other similar cloth. You may pay the Ry. fare for her & her children for their return to Delhi & advance something more. If she does not travel by rail,

Sometime back while I was yet at Hoshiar Pur, a letter was received from Bonn addressed to you c/o me. The letter is in German. Rendered into English, it would run thus:

Highly respected Mr. Dr. Satya Vrat,
The Foundation of Alexander von Humboldt

but is provided with conveyance (say Mr. Balraj's car), then you may give her Rs 25/- for the purchase of cloth.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

has been busy with a thorough examination of your request for a Stipend. The no. of available stipends for the year 59–60 being small & the number of applications so far received, it would not be possible to award Stipends to all candidates.

The Foundation might consider your application (with all details) in the Selection for the next year. In support of your proposal, the Foundation would require in the autumn of this year further (i.e. fresh) testimony which should give it definite information about the progress you have made in the acquisition of the German Speech & such other details as would be helpful to your candidature. You may send these details directly to the Foundation by November, 15, 1959. Only after the receipt of such information would your proposal for a Stipend for the year 1960–61, be considered afresh by the Selection-Committee.

with best compliments,

I am enclosing the original letter herewith. We are very much concerned about your present health. Do not strain yourself too much. Take physical exercise; a mere walk would not do. It is time you build your physique. Are you confirmed? Are you informed of your confirmation officially? What about

your Provident Fund? My love to Charmi
Yours affectionately
Charmdeva Shastri.

CC-0. Prof. Satya Vrat Shastri Collection.

6000/60 G

Phone No. 6936

Digitized by Sarayu Trust Foundation and eGangotri

Bhandarkar Oriental Research Institute

POONA 4 (India)

Date 6-3-61

My dear friend,

Many thanks for your letter of 2-3-61.

You are permitted to include your paper in the Annals (Vol. 39, Nos 1 & 2 - pp. 68-78) in your new book.

With kindest Regards

Yours

Curator

CC-0. Prof. Satya Vrat Shastri Collection.

POST-CARD

Digitized by Sarayu Trust Foundation and eGangotri

To

Dr. Satyavrata
Shastri
M.A., Ph.D.
3/54 Rupnagar.
Delhi-6

CC-0. Prof. Satya Vrat Shastri Collection.

जयपुरतो भट्टमथुरानाथशास्त्रिणस्तु नागताः। अम्बालयतः
इति वत्सलस्ते [illegible] मई मासस्यैकादशेह्नि

प्रिय सत्यायुष्मानेधि।

जालन्धरे वर्तमानोहं ते पत्रं प्रापम्, अद्य चेहापरम्। जालन्धरे शोभनोभूद् विदुषां समवायः। पञ्चापाद्बहिःस्थास्तु विरलाः। वाराणस्याः श्रीगिरिधरशर्माणः, श्रीकालिचरणभट्टा विश्वविद्यालये व्याकरणाध्यापकाः, श्रीब्रह्मदत्ता जिज्ञासवः, श्रीकेदारनाथाश्च। द्वौ च परीक्षार्थिनौ। ययोरेकतरेण श्रीरामप्रसादेन मुद्रासहस्रं पारितोषिकमधिगतम्। बीकानेरतो जयपुरतश्चापि द्वित्राः समभिलन्। मया तत्र द्विर्भाषितम्। गीताः प्रब्रूहीत्यधीष्टेन, पञ्चनदीयसंस्कृतसाहित्यसम्मेलनमुद्घाट्यतामिति प्रयुक्तेन च। पूर्वत्र सर्वस्य सामाजिकस्य कृते हिन्द्या प्रवचनमकारि, परत्र तु विद्वत्समाजस्य कृते संस्कृतेन। सम्मेलनस्य कारणात्

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

अहमम्बालये सार्धां चतुःशतीं रूप्य-
काणां समग्रहीषम्, तेन सर्वे सम्मे-
लनाधिकृताः परं व्यस्मेषत। जाल-
न्धरे तु नापपारमपेक्षितमितिहास-
पुस्तकमवाप्तुम्। डी.ए.वी. कालेजाध्यक्षेण
यावत्प्राध्यापकाः प्रतीष्टपूर्वाणि पुस्तकानि
न प्रत्यावर्तयन्ति तावन्नान्यत् पुस्तकमा-
दातुमर्हन्तीति नियम उद्घोषितः। मध्ये
म्बालये सर्वाणि त्वदपेक्षितानि पुस्त-
कान्याप्स्यामि सम्प्रेषयिष्यामि चाप्येरा-
वाप्स्यतीति। अत्र स्वस्थस्तिष्ठेः
परिश्राम्यामीति भवति न तु परिश्रयामीति।

नाम Shri Satya Vrata Shastri M.A.
पता Shri Madan Mohan Farma M.A.
Blairathal
Lower Flat,
Simla - East

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

देहलीत:

Digitized by Sarayu Trust Foundation and eGangotri

१८।३।५८

प्रिय सत्यायुष्मानेधि,

अथ पूर्वह्णि सम्प्राप्तं ते वृत्तं किमप्युदवीविजन्माम्। अत्र कथं प्रतिकर्तव्यमितीहस्थोहं नेशे वक्तुम्। बहु चिन्तयन्नपि न पारयामि प्रतिपत्तिमिष्टां निर्देष्टुम्। इदमेव तु विवक्षे-स्वे कर्मणि सर्वात्मना व्याप्रियस्व, आर्जवेन च गुरुषु वर्तस्व, विनेयेषु च हार्देनातिरिक्तेन प्रवर्तस्व। नान्यच्चिन्तय, न च रुष्य, न वाऽपरागमर्हति जने समीरय। शिवं गतिः शिवः सर्वं साधू करिष्यति

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

द्विषमपि सुहृदं करिष्य-
ति। मानसं च तवाभी-
लं हरिष्यतीति श्रद्धत्स्वे-
ति भूयोभूयः प्रणुदंस्त्वां
विरमाम्यहं वत्सलस्ते
तातश्चारुदेवश्च
शास्त्री।

Dr. Satya Vrat Shastri
M.A., Ph.D.
Quater No. 4, Rajmahal,
Kurukshetra P.O.
(Dist. Karnal)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

वाराणसीतः
२३।२।६१

प्रिय सत्य ज्योग्जीव्या नित्यं चाभ्युदियाः,

पत्रं ते विदम-
वेदिषं चावृत्तम्। परह्यो जालन्धरे पत्रं प्राहिणवं सम-
वेदनां चावेदयम्। देहलीस्थरेडियोधिकृतैरधीष्टस्त्वं
संस्कृतशिक्षां त्रिर्विवरीष्यसीति तत्कृतोभ्युपगम-
स्तवार्हन्त्याः। एवं कालक्रमेणोत्तरोत्तरं प्रकर्षमाप्ता-
सीति दृढं प्रत्येमि। इदं ते प्रीतये भविष्यति ज्ञायमानं यदावां
सद्योवक्रीतं गेहान्तरमद्यैवापराह्णे प्राविक्षाव। इदं च
गेहमगारद्वयात्मकं प्रकाशं प्रवातं च पृथगुच्चारशालम
परतन्त्रस्नानागारं च। त्रिभूमे भवनेऽयं नोधिवासः प्रथमा-
यां भूमौ। प्रमुखे पृष्ठतश्च रथ्ये इत्यव्याहतौ गमागमौ सदा-
गतेः। विंशतिश्च भद्रा अस्यावक्रयो मासिकः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD

ADDRESS ONLY

Dr. Satya Vrat Shastri
M.A., Ph.D.
3/54, Rock Nagar,
Delhi—6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

कालसमुद्देशे तेन महात्मना विचारं प्रवक्ष्ये तन्मतं होश्यारपुरतः
च ज्ञास्ये। स्वः कुशलादन्तः सम्प्रेष्य इति प्रेरयन्विरमति ९।४।५४.
तातस्ते चारुदेवः॥

प्रिय सत्यायुष्मानेधि। अहमिहास्य मासस्य चतुर्थेहनि
प्रदोषे प्रापम्। मध्येमार्गं जालन्धरे कञ्चित्कालमगमयं
स्वागतसमित्या च तदहः समवेतया समभवम्, वृत्तं
च तदीयं कलया समवेदम्। भूयश्च षष्ठे वासरे जालन्धरं-
प्रत्यगामाकाशवाण्या स्वां वाचं प्रसारयितुम्। इदानी-
महं स्वकार्यनिरतोऽनन्यमनाः सुखं कालं नयामि। इद-
मेवैकं दुःखाकरोति नेह तादृशी भोजनसंविधाऽस्ति
यादृशी ममानुगुणा स्यात्। सुलभे नाम दधिपयसी, परं
ते याप्ये भवतो न प्रशस्ये। शाकाद्यपि न विविच्य
पाकाय परिगृह्यते, किन्तर्हि यत्किमपि स्वल्पव्ययं भवति
तदादीयते। उपशमीत भोक्तुर्भावोपशयिष्ट तदिति
नाद्रियते। अस्तां तावदियं कथा। कथान्तरं चि-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD

ADDRESS ONLY

DELHI 10 APR 8-30 AM

INDIA

श्री सत्यव्रत शास्त्री
एम. ए.
पंजाबी मुहल्ला
अम्बाला छावनी
Ambala Cantt

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
९।८।५६

प्रिय सत्यायुष्मानेधि । अद्य चत्वारो वासरा ममात्र सम्प्राप्तस्य । दश द्वादशान्वासरानतिरिक्ताविह तिष्ठासामि, भोजनसंविधा साधीयसी नेति नोपपत्स्यते चिरायात्रावस्थानम् । अन्वहं परमान्नमपि सेव्यमानं न सुष्ठु जरिष्यति, तस्मात्पय एव केवलं दधिसहचरितमुपभुञ्जे । एवं क्रियमाणे सौहित्यं न भवति । तेन संकल्पितचरा त्समयादर्वागेव भवतः प्रस्थायिष्यते साध्वाश्रमं प्रतीति निश्चितप्रायं प्रतीयते । मध्येपथं जालन्धरे द्व्यहं त्र्यहं वा ऽवस्थास्ये भूषाः काश्चित्सुवर्णविकारास्तत्र स्वर्णकारेण कारयितव्याः । जालन्धरे स्थितिं कुर्वता मया मेनन्महाशयस्य पं० परमेश्वरानन्दस्य चाश्रावि नैषमः प्राच्यविद्यालयो होश्यारपुरं संक्रमिष्यति तत्र तदर्थस्य वेश्मनो वैधुर्यात् । तथापि होश्यारपुरमनुपेत्य न शक्ष्यते साधीयो वस्तुस्थितिर्विज्ञातुम् । तत्रोपपन्न एवाहं सविस्तरमत्र विषये वक्ष्ये, तेन कालः कश्चित्प्रतीक्ष्यः । एवं भणन्ति लोकाः श्रीजगन्नाथप्रभृतयः श्रीविश्वबन्धौ समनुरक्ता

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Sarayu Trust Foundation and eGangotri

नाम ति हि तस्मादु द्विजन्मा सुधीः, अतो
नेच्छन्ति विद्यालयसङ्घान्ति साधयामि
विरुन्धन्ति च तां मेव केनापि व्यपदेशेन।
नीलीबारेण काचिद्भूतैरुषसं प्रति प्रेरितं
वयं तु मया ~~ज~~ ज्ञापि नापि, किमरो
देहल्यामपि नासादि त्यया? अप्रेम-
नाथ स्तु स्माह प्रेरितं वयमिति। अयं च मया
शनौ प्रातर्विहरमाणस्य सम्मुखं स्तु। भूपाल-
यं कालातिक्रमः, न जाने किं कुतः। अन्या
प्रयत्नं स्तं शरीरे सविशेषमादृतः सन्नः।
शरीरं मनुपेक्ष्यम्, व्यायामस्यैकं साधनं
नैरुज्ये करि क्षेत्रे चेत्यसकृत् स्मारयन्ति स्म।
स्मृतं जटिलस्ते तात श्चारुदेवरशास्त्री।
इदानीमेव प्राप्तं विहरन् वयमिति तत्तद्विषये चिन्तयन्ति।

पोस्ट कार्ड

साथ का कार्ड जवाब के लिए

केवल पता

नाम डा० श्री सत्यव्रत शास्त्री, एम्.ए.
पी. एच्. डी.

पता २३ एफ्, कोल्हापुर रोड
कमला नगर

डाकखाना देहली — ६

ज़िला Delhi — 6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

सर्वथा कल्याण भवन्तम्
रसमयं समयं गमयामि ।
श्रीमतां च सहपुत्रपौत्रा सहस्रधा-
णां सहभार्याणां चार्याणां
सततमनामयं कामयमानोऽ-
हं पूर्णं पुरुषायुषं चोत्प्रेक्षमा-
णो भगवन्तं परमेष्ठिनं याचे ।
इहेयतां सता मया प्रभवैवाध्यु-
षितेन तदानीं भविष्यते ।
इदानीं तु त्रयोदशीं तिथिं
यावद् गृहे स्थाता [illegible]
[illegible] / भवदीयप्रिय
विद्यानिधिः

पोस्ट कार्ड
POST CARD
जवाबी
REPLY
केवल पता
ADDRESS ONLY

POSTAGE
INDIA
5 nP
5 नपै

सेवायाम्
श्रीयुत पूज्य प. चारुदेवजी
शास्त्री एम. ए.
शक्तिनगर
१० ए/४
P.O. शक्तिनगर
देहली
[illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Vishveshvaranand Vedic Research Institute
Head Office: HOSHIARPUR :: Sub Office: CHANDIGARH
(Panjab, India)
Digitized by Sarayu Trust Foundation and eGangotri

Hony. Academic Adviser
Dr. SIDDHESHWAR VARMA

284, SECTOR 16-A
CHANDIGARH-2

No._____ Dated 12.3.65

Dear friend,

Pray accept my admiration for your refined sensibility as expressed in your favour of 11.3.65. I shall certainly let you know the exact date and place when it could be convenient for you to meet me at Delhi.

With all good wishes to you and to yours,

Love yours,

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

विश्वेश्वरानन्द वैदिक शोध संस्थान

कार्यालय : होशिआरपुर :: उप-कार्यालय : चण्डीगढ़

Dr. Satyavrat,

3/54 Roop Nagar,

Delhi-7

CC-0. Prof. Satya Vrat Shastri Collection.

कार्यालय : होशिआरपुर :: उप-कार्यालय : चण्डीगढ़

Digitized by Sarayu Trust Foundation and eGangotri

Dr. Satyavrat,

3/54 Roop Nagar,

Delhi-7

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Dr. Satyavrat,

3/54 Roop Nagar,

Delhi-7

CC-0. Prof. Satya Vrat Shastri Collection.

Vishveshvaranand Vedic Research Institute

Head Office : HOSHIARPUR :: Sub Offie : CHANDIGARH
(Panjab, India)

Hony. Academic Adviser
Dr. SIDDHESHWAR VARMA

284, SECTOR 16-A
CHANDIGARH-2

No._____ Dated 12.3.65

Dear friend,

Pray accept my admination for your refined sensibility as expressed in your favour of 11.3.65. I shall certainly let you know the exact date and place when it could be convenient for you to meet me at Delhi.

With all good wishes to you and to yours,

Ever yours,

Siddh

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Digitized by Sarayu Trust Foundation and eGangotri

विश्वेश्वरानन्द वैदिक शोध संस्थान

कार्यालय : होशिआरपुर :: उप-कार्यालय : चण्डीगढ़

आदरी शास्त्रीय परामर्शक—
डा. सिद्धेश्वर वर्मा

६ जे/१२, सेक्टर १६-ए,
चण्डीगढ़-२

सं. 1518 ति. 2.1.64

सुहृद्वराः, अभिनवसंवत्सरोद्भवे श्रीमतां मंगलावाहकसूक्तिभिरनुगृहीतोऽयं जनः।

भवदखंडकल्याणाभीप्सुः,
सिद्धः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

विश्वेश्वरानन्द वैदिक शोध संस्थान

कार्यालय : होशिआरपुर : : उप-कार्यालय : चण्डीगढ़

आदरी शास्त्रीय परामर्शक—
डा. सिद्धेश्वर वर्मा

२८४, सेक्टर १६-ए,
चण्डीगढ़-२

सं. .....

ति. 27.10.65

सुहृद्वरा:

दीपावलीमहोत्सवे भवत्प्रेषितेन प्रोद्भावितशुभभावनात्मकेन छन्दसाऽनुगृहीतोऽयं जनः ।

भवदभ्युदयाभिलाषी,
सिद्धः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri



Dr. Satyavrat,

3/54 Roopnagar,

Delhi-7

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Dr. Satyavrat,

3/54 Roopnagar,

Delhi-7

CC-0. Prof. Satya Vrat Shastri Collection.

विश्वेश्वरानन्द वैदिक शोध संस्थान

कार्यालय : होशिआरपुर : : उप-कार्यालय : चण्डीगढ़

आदरी शास्त्रीय परामर्शक—
डा. सिद्धेश्वर वर्मा

२८४, सेक्टर १६–ए,
चण्डीगढ़–२

सं. .....

ति. 27.10.65

सुहृदा :

दीपावलीमहोत्सवे भवत्प्रेषितेन प्रोद्भावितशुभभावनात्मकेन छन्दसा न, गृहीतोऽयं जनः ।

भवदभ्युदयाभिलाषी,
सिद्धः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Digitized by Sarayu Trust Foundation and eGangotri

Vishveshvaranand Vedic Research Institute
Head Office : HOSHIARPUR :: Sub Offie : CHANDIGARH
(Panjab, India)

Hony. Academic Adviser
Dr. SIDDHESHWAR VARMA

284, SECTOR 16-A
CHANDIGARH-2

No._____ Dated 23.5.64

Dear friend,

You have further enhanced my delight by your favour of two registered parcels, for which I thank you.

But it is a pity that the tyranny of engagements already booked in another channels will deprive me of this pleasure for some weeks. Only yesterday I was relieved of a seven days' seven hours daily Seminar on the Himalayan languages!

But I assure you of my best attention to your production as soon as engagements permit.

Ever Yours,

Siddh

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Dr. Satyavrat
3/5-4 Roopnagar
Delhi-6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड
POST CARD

केवल पता
ADDRESS ONLY

भारत
INDIA

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Vishveshvaranand Vedic Research Institute
Head Office: HOSHIARPUR :: Sub Offie: CHANDIGARH
(Panjab, India)
Hony. Academic Adviser
Dr. SIDDHESHWAR VARMA
284, SECTOR 16-A
CHANDIGARH-2

No._____ Dated 18.8.65

Dear friend, It is so kind of you to propose a call on me on the 20th inst.; but I am shocked to inform you that my last week of this month is already booked with other people and so this tyranny will deprive me of a ~~[illegible]~~ with you.

But if you could come at 9-15 A.M. on the 20th inst. and see me for some minutes, not exceeding 20 minutes, it will be a favour on your part which I shall gratefully appreciate.

Yours,

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Dr. Satyavrat Ji
3/54 Roop Nagar
Delhi

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

यावद्धातुः धुरीणस्तत्र शोभते
न ज्ञायते कियद्वर्षपर्यन्तं
निवर्तनं के भविष्यति
पुरुषं प्रस्थाप्य । अधन्यः स
कपिलो विपुलमेनर्गलं
भषणं करोतीति नात्रास्त्यर्थं
कार्यमार्यैरिति विरमति
जनः

पोस्ट कार्ड

केवल पता

To

Dr Satya Vrat M.A.
3/54, Roop nagar

DELHI-6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

यावच्चतुर्धुरीण स्तत्र शोभते
न ज्ञायते कियद्वर्षपर्यन्तं
निवर्तनं के भविष्यति
पुरुन्दुप्रस्थाति । अधन्यः स
कपिलो विपुलमेनर्गल्यं
भक्षणं करोतीति नात्रास्त्यं
कार्यमार्यैरिति विरमति
बन:

पोस्ट कार्ड

केवल पता

To

Dr Satya Vrat M.A

3/54, Roop nagar

DELHI-6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

रथाष्टवीश्वरात्
कार्तिकस्य द्वितीयायाम्

तत्र भवत्सु श्रीमत्सु सत्यव्रतेषु विनिवेदयन्ति
तेषामेव स्वजनः कश्चिद् यद् ह्य एवाधिगतं
दलमलं प्रमोदाय प्रभूताय तस्य मनसः ।
अधिगतवृत्तश्च स पुनरपि स्वासामर्थ्यं
तत्रागमने विनिवेदयन् करोति क्षमायाचनं
पुनः पुनः । चन्द्रोऽन्यो वा कश्चिद् द्रविस्त्यज-
तीन्द्रप्रस्थमिति न मे मनसि कोऽपि विशेषो-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Dr Satyavrat,
3/54 Roopnagar,
Delhi – 7

CC-0. Prof. Satya Vrat Shastri Collection.

Vishveshvaranand Vedic Research Institute

Head Office HOSHIARPUR :: Sub Offie CHANDIGARH
(Panjab, India)

Hony. Academic Adviser
Dr. SIDDHESHWAR VARMA

284, SECTOR 16-A
CHANDIGARH-2

Dated 26.12.65

No. .....

Dear friend, Thanks for yours of the 20th, along with your paper which of course will receive my best attention, but I do not know when, for my table is already groaning, being overloaded with unopened parcels for reviews!

Ever yours,

Siddh

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Vishveshvaranand Vedic Research Institute

Head Office HOSHIARPUR :: Sub Offie CHANDIGARH
(Panjab, India)

Hony. Academic Adviser
Dr. SIDDHESHWAR VARMA

284, SECTOR 16-A
CHANDIGARH-2

No. ..... Dated 26.12.65

Dear Sind, Thanks for Yours of the 20th, along with your paper which of course, will receive my best attention, but I do not know when, for my table is already groaning, being overloaded with unopened parcels for reviews.

Ever yours,

Siddh

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

Dr. Satyavrat,
3/54 Roopnagar,
Delhi – 7

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम Dr. Satya Vrat Shastri
M.A., Ph.D.

पता 23 F, Kohlapur Road,
Kamala Nagar,

डाकखाना

जिला Delhi—6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

मणि भण्डार
रेलवे रोड, जालन्धर
शहर
६. ९. ५६

प्रिय सत्यव्रतायुष्मानेधि।

अद्य पत्रं तेऽध्यगमं वृत्तं चावागमम्
इदं माम् प्रियाकरोद्यत्त्वं देहलीस्थ विश्वविद्यालये एम्. ए. परी-
क्षायां पञ्चाप विश्वविद्यालय विशारदपरीक्षायां च परीक्षकत्वे
ध्यक्रियथाः। दैवज्ञः श्रीहंसराजो नूनं सत्यमुदाहरद् यदाह—
सत्यव्रतो वर्तमानान्वर्तिष्यमाणांश्च दुर्ददोऽवनमयिष्यति सर्वात्मनो-
द्युञ्जानांश्च परिभविष्यतीति। अत्र कर्मणि च विप्रास्तस्य साचि-
व्यं करिष्यन्ति, अन्यत्राभ्युदयेपि ते सहायभावं यास्यन्तीति च
व्यतिरेकं व्याहार्षीत्। रविवासरेऽतः प्रभविष्यामि प्रस्थातुमिति
बलवदाशंसे। मध्येमार्गं [illegible] नानिपते यात्राविच्छेदं चेकीर्षन्नपि
न शक्ष्यामि कर्तुं [illegible] निधेः सकाशात् पत्रं
किमप्यापि। अम्बालये तु नियतमेकरात्रं वत्स्यामि।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड
POST CARD

केवल पता
ADDRESS ONLY

5 nP INDIA

Dr. Satya Vrat Shastri
M.A., Ph.D.
3/54 Roop Nagar
Delhi — 6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

वाराणसीतः
१७।११।३०

प्रिय सत्य सर्वमायुरिहि ।

अद्य प्रदोषे पत्रं तेऽविदम
वेदिषं च वृत्तम् । इतः कतिषु चिदहःसु ते पितृव्यस्य पत्र
मासादयं यत्रासौ मां संनिकृष्यमाणे स्वस्य ज्येष्ठस्य सुतस्यो
पयामे सन्निधानाय मां बलवत् प्राणुदत् । अहं च तत्रा-
नलङ्कर्मीण इति मर्षणीय इति व्यज्ञापयम् । त्वं तु सपुत्र-
कलत्रस्तत्रोपस्थास्यस इति नात्र लोको न्यथा क्षमिष्यते
ग्रहीतुम् । या तेऽम्बायाः समवस्था शारीरी, या च मामिका
तां तत्र समवेतस्य जनस्य व्याख्यातुं विप्रतिपत्तीश्च सं-
भवन्तीर्विनेतुं विभविष्यसीति स्वान्तं मे शान्तम् । स्थाने
स्मारितोस्मि गृहीतचरं पुस्तकद्वयम् । अकालहीनं च तद्गृ-
हानुपस्थाय तत्प्रत्यादिशे । अथ ते तेम्बा सविशेषमे-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

SAVES

नाम श्री सत्यव्रत शास्त्री एम.ए.

c/o

पता श्री पी० एम० द्विवेदी

डाकखाना आर्य होस्टल

ज़िला नेपाली खपड़ा

बनारस

(यू० पी०)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

माश्रित्य ज्वालापुरीयं महाविद्या-
लयं सेवेयेति। ते वक्तव्या नाहं-
भृतिमुपभुज्य सेवितुकामः। उद्विजे
हं भृतेः। अलं मे परितोषः। परं
वेतनमनादाय तदैव सेवां प्रक्रम्य
यदा सत्योऽनुसन्धानप्रयोजिकां
राजकीयां वृत्तिं लप्स्यते न ततः पूर्वम्
इति। दृढं प्रतिजाने द्विश्च नाभिभाषे।
यूच पैशुन्येऽदन्तः, तेनाग्लोपित्वादुपधा ह्रस्वो
ऽति असुसूचत् इति रूपम्। अनोहृतेभ्य इति
सर्वाङ्ग इति भवति। स्फुर संचलने इत्यस्य गिचि इति

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

पोस्ट कार्ड
केवल पता

नाम श्री सत्यव्रतशास्त्री (म्यू.ए.)
पता आर्य समाज
डाकखाना बुलानाला
ज़िला बनारस
Banaras P.O.
(U.P.)

अपुस्फुरदिति रूपमात्वपक्षेपीति माधवीय धातुवृत्तिः।
अत्र गुरुचरणाः प्रष्टव्याः, [illegible] ॥ इति
विरमति । अगस्त्यस्य चतुर्थे
चारुदेवशास्त्रीणां हृदि।

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्यायुष्मानेधि।

पत्रं ते धिगतं वृत्तं चाव-
गतम्। अदः प्रार्थनापत्रद्वितयमहं श्री विश्वबन्धुसका-
शादवापम्। श्रीजगन्नाथेन प्रहितं द्वयं तु क्वचिन्मध्ये-
मार्गं दशाहं लम्बितम्। अतिक्रान्तमासस्य विंशेहनि
जालन्धरतः सम्प्रेषितं मासतमे दिवसे मामिहोपागात्।
आस्तां तावदियं कथा। नेह किञ्चिद्गोप्यमस्ति। आर्य-
च्छात्रावासे वासो लभ्यीति प्रियं मे। तत्र च सुहृद्वर्गेण
संवास इति जाने सुखितः कालं नेष्यसि। आशासे
कालेनैतावताऽध्यर्धं शतं मुद्रास्तेऽभ्याशं गताः स्युः।
यत्नतो रक्षेरिमं द्रविणराशिम्, मात्रोदासितो भूः।
डाक्टरमहाभागा इच्छन्ति शतं रूप्यकाणि निर्वेश-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम Dr. Satya Vrat Shastri, M.A., Ph.D.

पता 237, Kotla-Mubarakpur

डाकखाना Kamla Nagar

जिला Delhi - 6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

साध्वाश्रमतः
२०।११।५६

प्रिय सत्यायुष्मानेधि।

रविवासरे तिक्रान्ते हं लूधिया-
मगां भिषग्वरं प्रियधर्मपालं चादर्शम्। महन्नाम मां
समभावयद् भिषग्वरः सुहृद्भिः समेतः। चिरं च मया
समलापिषुः स च तद्वयस्याश्च। प्रियधर्मपालोपि सर्वं
तं कालं तत्र संन्यधीयत। भिषग्वरस्य गुण्यां तां
कन्यकामप्यदर्शं तया समं कामपि कालकलां सम-
लपिषं च। सर्वथा निभृता गुणाढ्यापि सा यत्सत्यं
मह्यं नारुचत्। वर्णो नास्ति यः स्पृहाविषयः स्याद्,
अङ्गसौष्ठवमपि नास्ति यदुचितं स्यात्। कान्तिस्तु दूरापेता।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

केवल पता

नाम श्री सत्यव्रत शास्त्री

पता ४२२, बिरला होस्टल,

डाकखाना हिन्दू यूनिवर्सिटी

जिला वाराणसी (यू. पी.)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
६ । ३ । ५४

प्रिय सत्यायुष्मानेधि । ह्यस्तवैकं पत्रमधिगतमद्य चैकम-
परम् । वृत्तं च वेदितव्यं विदितम् । बाढं तदपि पत्रं ते
मामापद्यत्र लेखो मे काशीस्थया नागरीप्रचारिण्या सभया
प्रकाश्य इत्यभ्युपेतः पारितोषिकं च विंशतीं रूप्यकाणि प्रति-
श्रुतानीति त्वया विन्यासि । इयं ते समुत्साहवृद्धिरभिनन्दना
च, अस्माकं पुनरयमुत्सवः श्रवणयोः । मदीयः पर्यायवचन-
विवेको नाम निबन्धः सम्मेलनाधिकृतैरेव स्वे विवरण-
ग्रन्थे प्रकाशयिष्यत इति ह्यो भूयोपि लक्ष्मणपुरतः सुब्रह्मण्य-
महाभागैरावेदितम् । तेन तत्र विषये प्रकाशनादियत्नो ना-
रम्भणीयः । I. A. S. पत्राणि त्वत्प्रेरितानि यावदेव मामाप्नुवन्ति
तावदेव तानि निपुणं निरीक्ष्य सहशुल्कं देहलीं प्रति प्रहेष्यन्त इति
तत्र त्वया स्वस्थेन चेतसा स्थेयम् । श्रीभारद्वाजेन प्रत्यावर्तितानि
प्रश्नपत्राणि मयि तिष्ठन्ति, तानि शक्यानि तत्स्वामिना
यथेष्टं प्रतिग्रहीतुम् । गुरुमुख्याः परिशीलनं प्रक्रममाणेन त्वया

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड
POST CARD
उत्तर का कार्ड जवाब के लिए
THE ANNEXED CARD IS INTENDED FOR THE ANSWER
केवल पता
ADDRESS ONLY

POSTAGE
INDIA

Dr. Satya Vrat Shastri
M.A., Ph.D.
3/54, Roop Nagar,
Delhi — 6

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड
POST CARD
साथ का कार्ड जवाब के लिए
THE ANNEXED CARD IS INTENDED FOR THE ANSWER
केवल पता
ADDRESS ONLY

POSTAGE
INDIA

Dr. Satya Vrat Shastri
M.A., Ph.D.
3/54, Roop Nagar,
Delhi — 6

CC-0. Prof. Satya Vrat Shastri Collection.

वाराणसीतः
१२।४।३१

Digitized by Sarayu Trust Foundation and eGangotri

प्रिय सत्यज्योग्जीव्या नित्यं चाभ्युदियाः,

पत्रं तवासीषदं
वृत्तं च व्यज्ञासिषम् । श्रीगुप्तः सुजनः साधुवृत्त
इति विदितं नः । स माईमासस्यादिमं सप्ताहं यावद्
रेक्षति स्वेनाध्युषितमागारमिति प्रियं मे । ततोऽ
र्वाग्वा रिच्यादित्यपि सम्भाव्यं स्वार्थमागारान्तरं
विन्देच्चेत् । अस्त्वत्रार्थे वीतचिन्ताः स्मः । परम-
स्मदीयं प्रस्थानं संविधातुं त्वमिह महान्तमध्वानम-
तिक्रम्य नैदाघं चोष्माणमनुभूय सन्निदध्या इति
नापेक्षते । मार्गव्ययोपि भूयान्भवति । तेनोभयं परि-
हरणीयम् । इह सन्निकेचन च्छात्रा उपकृतपूर्वा ये

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

वाराणसीतः
१२।४।३१

प्रिय सत्यज्योग्जीव्या नित्यं चाभ्युदियाः,

पत्रं तवासीषदं
वृत्तं च व्यज्ञासिषम् । श्रीगुप्तः सुजनः साधुवृत्त
इति विदितं नः । स माईमासस्यादिमं सप्ताहं यावद्
रेक्ष्यति स्वेनाध्युषितमागारमिति प्रियं मे । ततोऽ
र्वाग्वा रिञ्च्यादित्यपि सम्भाव्यं स्वार्थमागारान्तरं
विन्देच्चेत् । अस्त्वत्रार्थे वीतचिन्ताः स्मः । परम-
स्मदीयं प्रस्थानं संविधातुं त्वमिह महान्तमध्वानम-
तिक्रम्य नैदाघं चोष्माणमनुभूय सन्निदध्या इति
नापेक्ष्यते । मार्गव्ययोपि भूयान्भवति । तेनोभयं परि-
हरणीयम् । इह सन्निकेचन च्छाया उपकृतपूर्वा ये

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अस्य मासस्य पञ्चविंशं वासरं
यावत्स्थिरैवावस्थाताह इति
निश्चेयम्। कथय कीदृशस्ते
महाभाष्यादौ प्रसरः। शीघ्रं
पत्रोत्तरं देवमिति प्रयुञ्जानो
निरमति वत्सलस्तेतात्

२ च ... ...

1953
4 SEP
3-PM
DELY.



POST CARD

THE ANNEXED CARD IS INTENDED FOR THE ANSWER

ADDRESS ONLY

EXPRESS DELIVERY
SAVE TIME

POSTAGE
PUNJAB

श्री सत्यव्रत शास्त्री एम्.
ए.
आर्य समाज
बुलानाला
बनारस
Banaras (U.P.)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अहियापुरतः
३।९।२३.

प्रिय सत्यायुष्मानेधि।

पत्रं ते धिगतमवगतं च वृत्तम्। इतस्त्रिषु दिवसेष्वहं जालन्धरं यातास्मि तत्र सर्वं समीहितं निर्वर्तयितास्मीति त्वया वीतचिन्तेन स्थेयम्। अहम् अम्बालास्थे श्रीगान्धिकालेजे औपाध्यायकमभ्युपागामिति नूत्न उदन्तः। प्रतिमासं २२० रूप्यकाः ४० रूप्यकैर्महार्घताहेतुकैश्चातिरिक्तैः सहिता मे निर्वेशो नियतः। अयमेव च निर्वेशः श्री गौतम महाभागस्य सेवातो निर्विवृत्सतोऽभूदिति न्यायमेतस्य ग्रहणं प्रतिभाति।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

POST CARD

ADDRESS ONLY

THE ADDRESS CARD IS TO BE USED FOR ADDRESS ONLY

INDIA

DELHI 4 SEP 1955 3-PM

CC-0. Prof. Satya Vrat Shastri Collection.

मुपचर्यमाणाऽसौ प्रकृतिमापत्स्यत
इति प्रत्येमि। वातकिनी सेति वात-
दोष शमनायौषधं सेवते विनिर्दिष्टम्।
नर्ते वाताद् वेदनेति भिषजां वादः। सेव्य-
मानेन चागदेन लघुभवन्तीं वेदनां लक्ष-
याम इति परितोषः। स्वं वृत्तं विस्तरशो
लेख्यं बलवती हि नस्तस्य विविदिषा।
वसेस्तु मुनि वस्तुमिति भवति। अनुदात्त-
पदेशो हि स धातुः। मातुस्ते सन्ध्याशिषो
भूयय इति शंसन्विरमति वत्सलस्ते तातश्चारुदेवः॥

पोस्ट कार्ड
साथ का कार्ड जवाब के लिए
केवल पता

नाम श्री सत्यव्रत शास्त्री, एम्० ए०
एम्० ओ० एल्, व्याकरणाचार्य
पता संस्कृताध्यापक
हंसराज कालेज
डाकखाना दिल्ली
जिला

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयत:
२१।६।५५

प्रिय सत्यायुष्मानेधि । त्वत्प्रेरितं दलमहियापुरम्प्राप्य पुन-
र्मामिह प्रापद् वृत्तं चावीविदत् । गृहान्तरं साधुतरम् मार्गसीति
साधु प्रवृत्तोसि । वर्तमानमागारं सुखदं भविष्यतीति यदन्वमा-
स्थास्तदन्यथाऽभूदिति सम्प्रति मार्गणायामवहिततरेण त्वया
भवितव्यम् । सम्भवत्समस्तदोषास्पृष्टं गेहकमवक्रयणीयम् ,
बंहीयस्यपि चेन्मात्रा प्रदेया । अहियपुरगमनं प्रति मनीषां
पर्यवीवृतम् । नेदानीं तत्र जिगमिष्यते । देहल्यां साधीयो-
गृहाधिगम एव प्रतिपाल्यते । तेन यावदेव तत्र सिध्ये-
स्तावदेव मामावेदयेः । त्वरितं त्वदन्तिकमुपैष्यावः । साम्प्रत
मस्ति कश्चिद् [illegible] शरीरे । नियत-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

मुपचर्यमाणा ऽसौ प्रकृतिमापत्स्यत
इति प्रत्येमि। वातर्द्धिनी सेति वात-
दोष शमनायौषधं सेवते विनिर्दिष्टम्।
नर्ते वाताद् वेदनेति भिषजां वादः। सेव्य-
मानेन चागदेन लघुभवन्तीं वेदनां लक्ष-
याम इति परितोषः। स्वं वृत्तं विस्तरशो
लेख्यं बलवती हि नस्तस्य विविदिषा।
वसेस्तमुनि वस्तुमिति भवति। अनुदत्तो-
नदेशो हि सः आर्तुः। मातुस्ते सन्त्वाशिषे
भूयस इति शंसन्विरमति वत्सलस्ते तातश्चारुदेवः॥

पोस्ट कार्ड

साथ का कार्ड जवाब के लिए

केवल पता

नाम श्री सत्यव्रत शास्त्री, एम्० ए०
एम्० ओ० एल्, व्याकरणाचार्य

पता संस्कृताध्यापक
हंसराज कालेज

डाकख़ाना दिल्ली

ज़िला

CC-0. Prof. Satya Vrat Shastri Collection.

त्वकिञ्चित्करीति न मनागप्या-
दरमर्हति । तेनातो व्यापाराद व्या-
वर्त्य चेतः स्वेऽनुसन्धानकर्मणि
प्रवर्तय, तत्रैवाहर्निशं व्यापृतो भव,
येन तेभिप्रेतसिद्धिर्हस्तं गता स्यात् ।
कथय कालमतिरिच्य ~~किञ्च~~ कानि
विषयान्तराणि स्वविमर्शस्य
विषयतां निनीष्यन्ते । अवश्यमत्र
विषये त्वरितं निश्चयो नुधाव्यः ।
श्रीझामहोदयैः सम्मर्शनीयतां
नियोगचिन्ता व्यासङ्ग इति परिहृत्य
प्रत्योत्तरमदीक्षते वत्सलस्ते जनकश्चासौ ॥

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

श्री सत्यव्रत शास्त्री
पूर्व, डे होस्टल
बनारस हिन्दू यूनिवर्सिटी
बनारस

POSTCARD
THE ANNUAL REPORT OF THE ADDRESS ONLY
13 NOV 5 PM
9 15 A.M.
INDIA

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
११।११।५४

प्रिय सत्यायुष्मानेधि।

अधिगतं ते पत्रमवगतं च वृत्तम्। असंनिहिते तस्मिन्महाभागे, न्तरेण च पत्रारोपितमनुज्ञानं न त्वया शक्यं वाराणसीतः प्रस्थातुं हंसराजकालेजे चौपाध्यायकमाजीवितुम्। कियच्चिरं चोदीक्षिष्यन्ते तत्कालेजाध्यक्षाः। अपि तैः कश्चित् परोऽवधिर्निरदेशि यतः परेण ते तत्र नियोगो नापेक्षिष्यते। किं प्रिंसिपलमहाभागैरपरं पत्रं ते प्रेरितिं यत्रेदमादिरर्थो न्यगादि। यन्मया प्रेषितं पत्रं तत्तु तैर्नाद्यापि प्रत्युक्तम्। मन्ये मां दुढमभिक्रुद्धास्ते। अस्तु। किं ते मा [illegible] तु दुरापा वाचनिकी

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पोस्ट कार्ड

29 NOV 59

केवल पता

नाम श्री सत्यव्रत शास्त्री

पता 59, डे होस्टल

डाकख़ाना बनारस हिन्दू यूनिवर्सिटी

ज़िला बनारस

(यू० पी०)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अम्बालयतः
३०।१२।५४

प्रिय सत्यायुष्मानेधि । अद्य प्राह्णे लेखस्ते हस्तं
गतः । सम्प्रति सर्वथा प्रकृतिप्रत्यापत्तिर्मे जनीति
मा स्म मा स्प्रति चिन्तां गाः । कोऽयं वासुदेवः
कृत्यश्च, यः पिण्डीवहन उपकरणीभावमुपनि-
नीषितः । पिण्ड्यस्तु प्रथमे सप्ताहे संस्कृताः-
स्थास्यन्ति । स सुजनो वाच्यः स्वयमुपेत्य
ता आददीतेति । किंच । त्वत्सकाशे यान्य-
तिरिक्तानि कुतुपादीनि करण्डकादीनि वा
तानि प्रियं धर्मपालं द्वारीकृत्येह प्रहेयाणि
यथा तानि त्वदर्थेऽर्थसम्प्रेषणे समुपयोगं नी-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

स्वस्ति। अम्बालय शिबिरा च्चारुदेवश्शास्त्री पुत्रमा-
युष्मन्तं सत्यव्रतं वाराणसीस्थं सस्नेहनिर्भरं वक्षसा
परिरभ्यानुदर्शयति तद्यथा — अविदं ते वृत्तमवेदिषं
च चिन्ताभराक्रान्तोऽसुखितश्चासीति। तेनादूयत मे
मनः। सत्यमनल्पं ते कृत्यमल्पीयांश्च त्वदुपयोग्यः कालः
अगृहीततत्तद्ग्रन्थाशयस्त्वं कथं तत्तन्मतं संगृह्णीयाः।
कथं वा स्थाने तत्तन्न्यासं कुर्या इति गुरोस्ते ते ग्रन्था
अध्येतव्याः सारग्रहायेत्यर्थादापद्यते। तथापि सततम-
भियुञ्जानस्त्वं तत्र सिद्धिमभीप्सितामाप्स्यसीति मा
स्म विषदः। प्रारब्धं परिसमापनीयमिति धीयतां
धीः। श्री सूर्यकान्तमहामाभारहन्ति खिस्तजन्ममह-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

स्वस्ति। अम्बालयशिबिराच्चारुदेवश्शास्त्री पुत्रमा-
युष्मन्तं सत्यव्रतं वाराणसीस्थं सस्नेहनिर्भरं वक्षसा
परिरभ्यानुदर्शयति तद्यथा — अधिदं ते वृत्तमवेदिषं
च चिन्ताभराक्रान्तोऽसुखितश्चासीति। तेनादूयत मे
मनः। सत्यमनल्पं ते कृत्यमल्पीयांश्च त्वदुपयोग्यः कालः
अगृहीततत्तद्ग्रन्थाशयस्त्वं कथं तत्तन्मतं संगृह्णीयाः।
कथं वा स्थाने तत्तन्न्यासं कुर्या इति गुरोस्ते ते ग्रन्था
अध्येतव्याः सारग्रहायेत्यर्थादापद्यते। तथापि सततम-
भियुञ्जानस्त्वं तत्र सिद्धिमभीप्सितामाप्स्यसीति मा
स्म विषदः। प्रारब्धं परिसमापनीयमिति धीयतां
धीः। श्री सूर्यकान्त[illegible] खिस्तजन्ममह-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.